Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

श्रीगणेशायनमः देवकीनंदनंकृष्णंजगदानंदकारकं भुक्तिमुक्तिप्रदंवंदे माधवंभक्तवत्सलं १ श्वेतद्वीपेसुखा
सीनंदेवदेवंरमापतिं चतुर्वक्त्रोनमस्कृत्यपप्रच्छपितरंसुत २ ब्रह्मोवाच हृषीकेशजगद्धातःपुराणश्रव
णकीर्त्तन प्रष्टव्यंब्रूहिमेदेवसर्वज्ञसकलेश्वर ३ मासानांमार्गशीर्षोहिमित्युक्तंभवतापुरा तस्यमासस्य
माहात्म्यंज्ञातुमिच्छामितत्वतः ४ कोदेवस्तस्यकिंदानंकथंस्नानंविधिश्चकः पुरुषैश्चात्रकिंकार्यंकिंभोक्तव्यं
किंरमापते ५ वक्तव्यंकिंतथापूजाध्यानंमंत्रादिकंचयत् तत्रयत्क्रियतेकर्म्मतत्तत्सर्वंब्रूहिमेच्युत ६
श्रीभगवानुवाच साधुपृष्टंत्वयाब्रह्मन्सर्वलोकोपकारिणा यस्मिन्कृतेकृतंसर्वंमिष्टापूर्त्तादिकंचयत् ७
सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं समवाप्नोतितत्सर्वंमार्गशीर्षेकृतेसुत ८ तुलापुरुषदानाद्यैर्यत्
फलंलभतेनरः तत्फलंप्राप्यतेमार्गमाहात्म्यश्रवणेनकिल ९ यज्ञाध्ययनदानाद्यैःसर्वतीर्थाव
गाहनैः संन्यासेनचयोगेननाहंवश्योभवामिच १० स्नानेनदानेनचपूजनेनहोमेनमौनेनजपादि १
भिश्च वश्योयथामार्गशिरेचमासितथानचान्येषुहिगुत्यमुक्तं अन्यैर्धर्म्मादिभिःकृत्वागोपितंमार्ग हा.मा.

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

Skanda Purana

Margasirsa M.

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

शीर्षकं मत्प्राप्तेः कारणं मत्वा देवैः स्वर्गनिवासिभिः १२ येके चित्तपुरा पकर्म्मणो मम भक्तिः परायणाः
तेषामेव स्वरूपं कर्त्तव्यं मार्गशीर्षमदापनं १३ मार्गशीर्षं न कुर्वंति ये नराः पापमोहिताः पापरूपा हि ते ज्ञेयाः
कलिकाले विशेषतः १४ अन्येष्वपि च मासेषु यत्फलं लभते नरः ततफलं प्राप्यते वत्स माघे मकरगे
रवौ १५ माघाच्छतगुणं पुण्यं वैशाखे मासि लभ्यते तस्मात्सहस्रगुणितं तुलासंस्थे दिवाकरे १६ त
स्मादयुतगुणितं वृश्चिकस्थे दिवाकरे उषस्युषसि यो मर्त्यः स्नानं विधिवदाचरेत १७ तुष्टोहं तस्य दास्या
मि स्वात्मानमपि पुत्रक अत्राप्युदाहरंतीमां शृणु पुत्र कथांतरं १८ नंदगोपो महावैश्यो विख्यातो भूतले र भवत
तस्यैव गोकुले रम्ये गोपकन्याः सहस्रशः १९ तासां चित्तं च मे रूपे लग्नमासीत्पुरा रनघ तासां बुद्धिः स
मुत्पन्ना मार्गशीर्षावगाहने २० ततस्ताभिः कृतं स्नानं प्रातःकाले यथाविधि मृदा प्रतिकृतिं कृत्वा कात्या
यिन्या मनोहरां २१ पूजां कृत्वा हविष्यं च भुक्तं ताभिः कृतानतिः एवं कृतेन विधिना प्रीतोहं मासमात्रतः २२

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

 वरोदत्तोमयात्मावैतावत्स्तुष्टेनचेतसा हेगोप्योभवतीनांचसंकल्पोविदितोमया २३ तदास्वामिमहाभाग्यो
 वृतस्यास्यप्रभावतः कदाचित्समयंप्राप्यरस्यथेमोःक्षपामया २४ मनोरथस्यपूर्त्यर्थंभवतीनांचयेप्सितं
दास्यामिवांछितंसर्वंभवत्याहंवशान्नामिया २५ गृहानयातमयादिष्टामांचस्मरतनित्यशः इत्यु
क्तास्ताययुःसर्वाःस्वेस्वेसद्मनिपुत्रक २६ स्मरंत्यःकृष्णचरितंकदाप्राप्स्यामहेवरं २७ इति
श्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येगोपीजनवरप्रदानंनामप्रथमोऽध्यायः १ ब्रह्मोवाच त्व
योक्तंविधिसंयुक्तंकर्तव्यंमार्गशीर्षकं कोविधिस्तस्यदेवेशसर्वंमेब्रूहिकेशव १ श्रीभगवानुवाच
रात्र्यंतेचसमुत्थायऋषःस्पृश्ययथाविधि नमस्कृत्यगुरुंस्वस्यसंस्मरेन्मांततोनव २ सहस्र
नामभिर्भक्त्याकीर्तयेद्वाग्यतःशुचिः बहिर्गत्वामातसमुत्सृज्यमलमूत्रेयथाविधि २ शौचंकृत्वा [illegible]
यथान्यायमाचम्यवाग्यतःशुचिः दंतधावनपूर्वंतुस्नानंकुर्याद्विधानतः ४ आदायतुलसीमूला २

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

मृदं ततपत्र संयुतं मूलमंत्रेणाभिमंत्र्य गायत्र्या वा महामते ५ मंत्रेरोलानुलिप्तांगः स्नायात् प्रथमं पुनः सुगंधैः कर्पूरैः
प्रनुच्छृतेसुच्छृतैर्वी जलैः स्नानंविधीयते ६ एवं स्नात्वा ततः पश्चादाचम्यच विधानतः उच्छृत्स्ववास
सी शुक्ले शुद्धे च परिधारयेत् ७ ततो देवानृषीन्तर्प्य पितॄनपि विधानतः धारयेदूर्ध्वपुंड्राणि पश्चात् संध्या
मंतः स्थितः ८ ब्राह्मणः द्वादशपुंड्राणि ब्राह्मणाः सततं वहेत् चत्वारि भूभृतां पुत्र पुंड्राणि द्वे विशांपतिः ९ एक
पुंड्रं च नारीणां शूद्राणां च विधीयते ललाटे उदरे चैकं वक्षे चैकं कंठकूपके १० कुक्षौ वाकोः कंधरे च
पार्श्वे पृष्ठे ककुद्यपि तिलकाद्वादशप्रोक्ता ब्राह्मणस्य महामते ११ ललाटे हृदि वाकोश्च क्षत्रीपुंड्रा
णि धारयेत् ललाटे हृदये वैश्यो भाले वै शूद्रयोषितौ १२ ललाटे केशवं विंघान्नारायणमथोदरे
वक्षस्थले माधवं च गोविंदं कंठकूपके १३ विष्णुं च दक्षिणे कुक्षौ वाकोश्च मधुसूदनं त्रिविक्रमं कं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

धरेत्तु वामनं वामपार्श्वके १४ पृष्ठे न्यसेत् पद्मनाभं स्कंधे दामोदरं न्यसेत् तत्प्रक्षालनतोयेन वासुदेवं च मू
र्द्धनि १५ अनेन विधिना कुर्यात् पुंड्राणि मम तुष्टये श्यामं कांतिकरं प्रोक्तं रक्तं वश्यकरं तथा १६ पीतं श्री
कारकं प्रोक्तं श्वेतं मोक्षकरं स्मृतं एकांतिनो महाभागाः सर्वभूतहिते रताः १७ सांतरालं प्रकुर्वंति पुंड्रं हरिप
दाकृतिं तस्माच्छिद्रान्वितं पुंड्रं महच्छिद्रं शुभावहं १८ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये प्रा
तःकृत्यादिनाम द्वितीयोऽध्यायः २ ब्रह्मोवाच पुंड्रं कतिविधं कार्यं ब्रूहि मम केशव पुंड्राणां
चप्रभेदं स्वामिन्मनो मे त्वं त भक्तिमत् १ हरिरुवाच शृणु वत्स प्रवक्ष्यामि पुंड्राणां विधिमुत्तमं यत्
कृत्वा मुच्यते पापी विष्णुसालोक्यमाप्नुयात् २ तुलसीमृत्स्नया चैव गोपीचंदनेन वै हरिचंदनतः का
र्यं शुभकर्म्मव्रतादिषु ३ गोपीचंदनमाहात्म्यं निबोध गदतो मम श्रीविष्णुतुलसीमूलान्मृदमादाय ३
भक्तिमान् ४ धारयेदूर्ध्वपुंड्राणि हरिस्तस्य प्रसीदति ५ या मृत्तिका द्वारवतीसमुद्भवा करे समादाय

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE.

ललाटपट्टके करोति नित्यं शुभमूर्द्ध्वपुंड्रं क्रियाफलं कोटिगुणं लभेत सः ६ क्रियाविहीनं यदि मंत्रहीनं
श्रद्धाविहीनं यदि कालहीनं कृत्वाललाटे घृतगोपिचंदनः प्राप्नोति तत् कर्मफलं सदाक्षयं ७ गो
पीचंदनसंभवं सुरुचिरं पुंड्रं ललाटे द्विजो नित्यं धारयते यदि प्रतिदिनं रात्रौ सदा सर्वदा यत्पुण्यं कु
रुजांगले रविग्रहे माघे प्रयागे तथा यात्रा ध्याति प्राप्नोति ततोऽधिकं मम गृहे संतिष्ठते देवता ८ य
स्मिन् गृहे तिष्ठति गोपिचंदनं भक्त्या ललाटे मनुजो विभर्ति तस्मिन् गृहे हं निवसामि सर्वदाक्षिता
रन्विता दुःखहरश्च तु मुक्तिरव ९ यो धारयेद्वारवतीसमुद्भवां मृदं पवित्रां कलिकल्मषापहां नित्यं ल
लाटे मम मंत्रसंयुतां यमं न पश्येदपि पापसंयुतः १० यस्यांतकाले सुतगोपिचंदनं बाहौ ललाटे
हृदि मस्तके च प्रयाति लोकं कमलापते मम गोपालबाती यदि ब्रह्महा स्यात् ११ गृहीन पीडंति न

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

रक्षसां गणा यक्षाः पिशाचोरगभूतदानवाः ललाटपट्टस्थितगोपिचंदनं संतिष्ठते तस्य मम प्रसादात् १२
ग्रस्नातो यः क्रियां कुर्यो दशुचिः पापसंभृतः गोपीचंदनसंपर्कात् पूतो भवति तत्क्षणात् १३ यः
पुनः कलिकाले तु मत्पुरीसंभवां मृदं मत्स्यकूर्म्मादिकं चिन्हं गृहीत्वा कुरुते नरः १४ देहे तस्य प्रवि
ष्टं मां जानीहि त्रिदशोत्तम नारायणायुधैर्नित्यं चिन्हितो यस्य विग्रहः १५ पापकोटियुक्तस्य
तस्य किं कुरुते यमः दक्षिणे च भुजे भक्तो बिभृयाद्वै सुदर्शनं १६ सव्ये तु शंखं बिभृयात् स ज्ञेयो विष्णु
रूपधृक् ललाटे च गदा धार्या मूर्ध्नि चापं शरं तथा १७ नंदकं चैव हृन्मध्ये शंखचक्रे भुजद्वये त
स्मात् सर्वप्रयत्नेन चक्रादीन् धारयेत् सदा १८ पुत्रमित्रकलत्राद्यैर्यैः कश्चिन्ममत परिग्रहः सह
देहेन सर्वोपि विष्णुप्रीत्यै मयार्पितः १९ पश्चात् सधर्म्मिमास्थाय तिष्ठ यावज्जीवनं मम भक्त्या वा व्यभि

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

चारिताथा सर्वदाप्तमनोरथः २० इतिश्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये तिलकमाहात्म्यंनामतृती
योऽध्यायः ३ श्रीभगवानुवाच अतःपरंप्रवक्ष्यामितुलसीमालिकाफलं तुलसीदलजांमाल
कंठस्थांवहतेतुयः १ ममोत्तीर्णांविप्रोबेतासनाकस्थोदिवौकसां तुलसीदलजांमालांममोत्ती
र्णांवहेत्तुयः २ पत्रेपत्रेऽश्वमेधानांदशानांलभतेफलं निवेद्यमत्तांमांमालांतुलसीदलसंभवां ३
वहतेयोनरोभक्त्यातस्यनैवास्तिपातकं सदाप्रीतमनास्तस्यमेवत्सतरोहिसः ४ तुलसीदलसंभूतां
योमालांवहतेनरः प्रायश्चित्तंनतस्यास्तिनाशौचंतस्यविग्रहे ५ तुलसीदलसंभूतांशिरसोवहुभूषणां
वाहौकरेचकर्णेचकंठेतुलसिधारणं ६ तस्यमर्त्यस्ययोदेहोमामकीनतरेवसा तुलसीदलमाला
भिर्भूषितःपुण्यमाचरन् ७ पितृणांदेवतानांचपुण्यंकोटिगुणंभवेत् तुलसीदलमालांतुप्रेतराज

चरेत् १

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

स्यपेभराः ८ इष्ट्वानश्यंपतिदूरेणवातोप्यूतंपथाजलं यद्गृहे तुलसीवृक्षंमंजरीदलभूषितं ९ भूतारश्च
५ भावंसंलोकंतद्गृहेनैवपुत्रक तुलसीदलमालाभिर्भूषितोभ्रमतेनरः १० दुःस्वप्नंदुर्निमित्तंचनभयंशात्र
वंकचित् तस्मात्सर्वप्रयत्नेनमालातुलसिसंभवा ११ पद्माक्षनिर्मिताभक्त्याफलैर्धाव्याःसुपुरायण
कृतसंध्यादिकोभक्तस्ततःसंपूजयेत्त्वमां १२ आचम्यैकाग्रमनसापूजामंडपमाविशेत् उपविश्यासनेरम्ये
कृष्णाजिनकुशोत्तरे १३ सम्यक्पद्मासनासीनोभूतशुद्धिंसमाचरेत् प्राणायामत्रयंकृत्वामंत्रेणारचलिते
द्विजः १४ उदङ्मुखस्ततःकृत्वाहृत्पंकजमनुत्तमं विकासितस्यकुर्वीतविज्ञानरविणाहृदि १५ ततक
र्णिकायांवन्ह्यर्कशशिबिंबान्यनुक्रमात् भक्त्यात्रयीमयंतस्मिन्चिंतयेद्वैस्ववोत्तमः १६ नानारत्नमयं कृष्ण०
पीठंतेषामुपरिचिंतयेत् तस्मिन्देव्यासहासीनंकोटिशीतांशुसन्निभं १७ चतुर्भुजंसुंदरांगंशंखचक्र ५

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

गदाधरं पद्मपत्रविशालाक्षं सर्वलक्षणलक्षितं १८ श्रीवत्सकौस्तुभोरस्कं पीतवस्त्रोपशोभितं विचित्रा
भरणैर्युक्तं दिव्याभरणभूषितं १९ दिव्यचंदनलिप्तांगं दिव्यपुष्पोपशोभितं विचित्राभरणैर्युक्तां देवीं त
तसन्निधौ स्मरेत् २० सहस्रं शतवारं वा जपेन्मंत्रं सुभक्तितः मनसैवार्चनं कृत्वा ततो विधिवदाचरेत् २१
पुरतो मम द्वारं चादिक्षु दीपान् नियोजयेत् पूजादौ पूजयेच्छंखं घंटां चैव प्रपूजयेत् २२ सुवासितेन तैलेन
कुर्यादभ्यंजनं हरेः कस्तूरीचंदनाद्यैश्च कुर्यादुद्वर्तनं शुभं २३ सुगंधवासितैस्तोयैः स्नापयेन्मंत्रपु
तैः शुभैः अर्घं दद्यात्ततो वत्स पाद्यमाचमनीयकं २४ मधुपर्कं ततो दद्यादन्यसर्वोपचारकान् वस्त्रैराभ
रणैर्दिव्यैरलंकृत्य यथाविधि २५ नैवेद्यं विविधं दद्यात्पायसापूपमिश्रितं सकर्पूरं सुतांबूलं भक्त्या
चैव निवेदयेत् २६ सुरभीणि च पुष्पाणि भक्त्या सम्यक् निवेदयेत् धूपं दशांगमष्टांगं दीपं च सुमनोहरं २७

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

माहात्म्य
मार्गशीर्ष०

प्रदक्षिणीकृत्य १

परि(?)ली प्रणामाद्यस्तुतिभिः शुचिरन्वहं स्वापयित्वा सुपर्य्यंके शयित्वा क्षमापयेत २८ इतिश्रीस्कंद
६ पुराणे मार्गशीर्षमाहात्म्ये पूजाविधिर्नाम चतुर्थोऽध्यायः ४ श्रीभगवानुवाच क्षीरस्नानं प्रकुर्वीत
येन रामममूर्द्धनि गंधपुष्पोदकं मंत्रैः सर्वोत्कृष्टं प्रशस्यते १ द्वादश्यां पंचदश्यां वा गव्येन पयसा मम स्ना
पनं देवदेवस्य महापातकनाशनं २ क्षीरस्नानेन सौभाग्यं दध्ना मिष्टान्नभोजनं घृतेन स्नापयेद्यो मां
नरो मम पुरं व्रजेत् ३ स्नानं शर्करया यस्तु कारयेन्मार्गशीर्षके [redacted]
[redacted] स राजा जायते लोके पुनः स्वर्गादिहागतः ४ कारयेन्मधुना स्नानं भक्त्या वै मार्गशीर्षके गजाश्व
रथसंकीर्णं स राज्यं लभते भुवि ५ क्षीराद्दशगुणं दध्नस्ततो दशगुणं घृतं गंधपुष्पोदकं मंत्रैः सर्वोत्कृष्टं कृ स०
प्रशस्यते ६ स्नापयेन्मार्गशीर्षे यः पंचामृतसुगंधकैः न स शोच्यो भवेज्जंतुर्वैधूनां भुवि मानद ७ शंखे ६
नाब्धो नरशतं स्नापयेन्मार्गशीर्षके शंखे शंखे सुवर्णस्य फलमाप्नोति मानवः ८ शंखे कृत्वा तु पानीयं

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

साक्षतंकुसुमान्वितं यःस्नापयेत्सहोमासेसर्वतीर्थफलंलभेत् ९ यस्यपादोदकंशंखेकृत्वामूर्ध्नीन
माश्रयेत् ग्रहाःरक्षांसिकूष्मांडाःपिशाचोरगराक्षसाः १० दह्युःशंखोदकंमूर्ध्नि विद्रवंतिदिशोदश
वादित्रनिनदैर्दिव्यैर्गीतमांगल्यनिस्वनैः यःस्नापयतिमांभक्त्याजीवन्मुक्तोभवेद्द्विजः ११ इतिश्रीस्कं
दपुराणेमार्गमाहात्म्येपंचामृतशंखोदकस्नानफलंनामपंचमोऽध्यायः ५ श्रीभगवानुवाच सर्ववाद्य
मयीघंटासर्वदाममवल्लभा वादनाल्लभतेपुण्यंयज्ञकोटिशतोद्भवं १ घंटानादःसदाकार्यःपूजाका
लेविशेषतः सर्ववाद्यमयीघंटासर्ववेदमयीयतः २ तस्मात्सर्वप्रयत्नेनघंटानादंतुकारयेत् प्रीतो
भवामिसततंघंटानादेनपुत्रक ३ यत्रतिष्ठतिपुरवैघंटा[redacted]सांकितोमम वैनतेयांकितंघंटासु
दर्शनंमुताथवा ४ ममाग्रेस्थापयेद्यस्तुतस्यगेहेवसाम्यहं धूपेनीराजनेस्नानेपूजाकालेचदीपके ५
घंटांवादयतेयस्तुममनैरूप्यंगतोहिसः चंदनस्यप्रवक्ष्यामिमाहात्म्यंममपुत्रक ६ सुचंदनंकेसरकं

पुरतो३

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

माहा॰

मार्गशीर्ष॰

कालागरुविमिश्रितं मृगनाभिसमायुक्तं जातीफलविमिश्रितं ७ तुलसीचंदनोपेतं ममात्यंतसुखप्रदं
६ महाविष्णोः कलौ भक्त्या दत्वा तुलसिचंदनं ८ योर्च्चयेन्मालतीपुष्पैर्न भूयः स्तनपो भवेत् यो हि भागवतो भू
त्वा कलौ तुलसिचंदनैः ९ नार्च्चयेद्यः सहोमासे न स भागवतोत्तमः कुंकुमागरुकर्पूरश्रीखंडमदसंयुतः १०
श्रालेपो यः सहोमासे कल्पकोटिं वसेद्दिवि कर्पूरागरुमिश्रेण चंदनेनानुलेपनं ११ मृगदर्पविशेषेणात्य
भीष्टं चंदनं मम १२ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये ब्रह्मचंदनफलं नाम षष्ठोऽध्यायः ६ श्रीभगवा
नुवाच शृणु पुत्र प्रवक्ष्यामि माहात्म्यं पुष्पसंभवं येन पुष्पेण मे प्रीतिर्भवेत् सम्यक् सुसंभ्रमः १ मल्लिका मालती चै
व यूथिका चातिमुक्तिका पाटला करवीरा च जयंती च जपा तथा चंपकश्चातकः कुंदो बाणः कतरमल्लिका
केतकीपत्रपुष्पं च तथा भृंगारकस्य च २ तुलसीपत्रपुष्पं च सदा प्रीतिकरं मम पद्मान्यंबुसमुत्थानि रक्तनी ६
लोत्पले तथा ४ मुनिपुष्पमशोकं च वकुलं गिरिशालिनं अपक्वैरविभिन्नैश्छेदैः प्रोक्षितैर्जंतुवर्जितैः ५ राम॰

न१

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

वूला तमोद्भवैः पुष्पैर्बिल्वपत्रैः प्रपूजयेत् एतैः पत्रैश्च पुष्पैश्च फलैश्चार्पितया हि मां ६ अर्चनं दश
स्वर्णस्य प्रत्येकं फलमाप्नुयात् एभिश्च पुष्पजातीभिः सहो मासे त्रंदंतिपे ७ ददामितेवांवेतुष्टः सकल
न्नात्र संशयः ८ इति श्रीस्कंदपुराणे माग श्री वि माहात्म्ये पुष्पमहिम्नो वर्णनं नाम सप्तमोऽध्यायः ७
हरिरुवाच तुलसीरोपणं ये वै कुर्वंति मनुजेश्वर ते कोटिपुरुषैः सार्द्धं हरिलोकनिवासिनः १
तृणानि तुलसीमूलाद्यावंत्युपहृतानि वै तावंति ब्रह्महत्यानां छिनत्त्येव न संशयः २ प्राकारं कार
येद्यस्तु तुलस्या मनुजेश्वरः कुलत्रयेण सहितो विष्णोः सारूप्यतां व्रजेत् ३ योर्चयेद्धरिपादाब्जं तुल
स्याः कोमलैर्दलैः न तस्य पुनरावृत्तिर्विष्णोर्लोकात्कदाचन ४ सिंचयेद्यस्तु तुलसीं चुलुकोदकमा
त्रतः क्षीरोदशायिना सार्द्धं वसत्याचंद्रभास्करं ५ मणिकांचनपुष्पाणि तथा मुक्तामयानि च
तुलसीपत्रदानस्य कलां नार्हंति षोडशीं ६ तुलसीमंजरीभिश्च यः कुर्यान्मम पूजनं न स गर्भ

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

माहात्म्य० दृष्टसर्व ३ ति २

मार्गशीर्ष०

मवाप्नोति मुक्तिभागी भवेन्नरः ७ आरोप्य तुलसीं वत्स संपूज्यत दलैश्च मां वसंति मोदमानास्ते श्वेतद्वी
पे च मे गृहे ८ श्रीमत्तुलस्यार्च्चयते सकृद्धिमां पत्रैः सुगंधैर्विमलैरखंडितैः पतत्स्वपापं परमे स्थितं तत्प
८ निरीक्षयित्वा परिमार्ज्जयेद्यमः ९ लिंगमभ्यर्च्चितं दृष्ट्वा सहोमासे च मामकं तुलसीपत्रनिकरैर्मुच्यते ब्रह्म
हत्यया १० वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलं न वर्ज्यं जाह्नवीतोयं तुलसी बिल्वपत्रकं ११ बिल्व
पत्राच्छमीपत्रात् जातीपुष्पात् सरोरुहात् क्षीरोदार्णवसंभूतां दर्पनीया सदा मम १२ अत्रेतिहासं वक्ष्यामि
शृण्वंतु मुनिसत्तमाः यथा ऽपश्यतिं वैश्यो देवशर्म्मा प्रसादतः १३ आसीत् कांतीपुरे वैश्यः कंजभद्रेति वि
श्रुतः कृषिकर्त्ता ज्ञानहीनो गवां पालनतत्परः १४ अत्यंतपापः सकरो लुब्धः क्षेत्रोतिष्ठद्दिवानिशं कदाचि
देकवारं सत्त्राप्ति किंचित् कदन्नकं १५ धान्यादिकं विक्रयित्वा संचितं विपुलं धनं तक्रं घृतं तथा क्षीरं ८
विक्रयित्वा तथा दधि १६ धनं बहुतरं तेन कृतं लोभवशात्मना तस्य माता पिता लोभो लोभः स्वजनवा कृत्स्न०

वी ४

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

धवाः १७ दिनेदिनेमहातृष्णाहृदयेपरिवर्द्धते यथायथागृहेद्रव्यंवृद्धिमायातितस्यहि १८ बुद्धोप्यविं
तयन्नाज्ञोकथंस्यान्मेधनंबहु देहंप्राप्यमहामोहग्रस्तोभ्योरतिसर्वतः १९ सहस्रमयुतंलक्षंकोटि
मर्बुदमब्जकं भविष्यतिकदाखर्वंन्निखर्वंचापिमेगृहे २० एवंसहस्रमयुतादिकंतस्यचैवगृहे खर्वंनि
खर्वंसंजातेतृष्णानैवप्रणश्यति २१ तेनव्ययस्तुपुण्येनकृतोनैवकदाचन पात्रेदानंनदत्तंतुदुष्कोडुर्वलेने
वच २२ कृपांकृत्वानदत्तंस्वंकदाचिदपितेनहि देवानपूजितास्तेनपितरोपिनतर्पिताः २३ श्राद्धका
लेतुसंप्राप्यश्राद्धंनश्रद्धयाकृतं भार्यावदतित्येतस्यदिनमेतत्समागतं २४ स्वकुलंश्राद्धकालेन
श्रीरामस्वमहामते तच्छ्रुत्वावचनंतस्यागृहंत्यक्त्वापलायत २५ धर्म्ममार्गंनजानातिनशृणोतिकदाचन
लोकान्पृच्छत्सुपापांश्चधनागमनकारणात २६ खनिमञ्जनिकंधातुवादंचैवपृथक्पृथक् पृच्छमा
नोभ्रमत्येकस्तृष्णयापरिमोहितः २७ नित्यंचिंतयतेस्पर्शमणिंचिंतामणिंतथा तृष्णानलेनदग्धो

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

रसौहाहाभूतोविचेतनः २८ वदास्यांतेवभूवास्यतनयोरिपुवत्स्थितः सुमुखेतिचकारास्यनामना
स्तिसुखप्रदः २९ मिष्टंमिष्टंसमश्नातिभोगानभुंजतिनित्यशः गृहान्नयातिद्रव्यार्त्तिंवार्यमाणःस
कुप्यति ३० मातरंपितरंवंधून्कुत्सितेचपुनःपुनः द्रावकस्त्रासकश्चैववहुनिष्ठुरजल्पकः ३१ तथापि
पितरौपुत्रंस्नेहेनैवममर्षत ३२ यदाप्यसौयौवनमुध्धतिंदध घृतैश्चपानैःकलकामिनीजनैः नि
षेव्यमानोविटगोष्ठिमध्यगश्चकारद्रव्यस्यक्षयंदिनेदिने ३३ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहा
त्म्येतुलस्यादिमहिम्निप्रासंगिककुंजभद्रवैश्यपेतिहासेनामाष्टमोऽध्यायः ८ हरिरुवाच एवं
तेनक्षयंनीतंसुमुखेनदुरात्मना धनंविटेभ्योमल्लेभ्यःकुमित्रेभ्योदिवानिशं १ घृतेनहारितंपश्चा कृस०
वीजमुप्तमिवोखरे यदानष्टंनिजधनंतदाचौर्यरतोऽभवत् २ एकदाचौरिकांकुर्वनधृतोराजभटैर्हि
सः नृपाज्ञयाघातितश्चमृतोयमपुरंययौ ३ पुत्रशोकेनदुःखात्मापापिर्घृणभृशार्दितः देशादे ८

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

देशान्तरं भ्रामन्नकुतश्चिन्नालभत सुखं ४ कदाचिन्निर्जनेऽरण्ये पर्य्यटन् क्षुधयार्द्दितः तृष्णया शुष्क
कंठोष्ठो गतचेष्टेंद्रियक्रियः ५ पपात विकलो भूमौ सर्वतश्चातिमूर्छितः तस्य भाग्यवशात्तत्र देवशर्म्मा
द्विजोत्तमः ६ आजगाम परिभ्राम्यं स्तीर्थयात्राप्रसंगतः पूजार्थं तुलसीपत्रं मंजरीसंयुतं वहु ७ गृहीत्वं
तं चरितं विष्णोर्गायमानो मुदान्वितः ददर्श पतितं तं तु कुजन्मानमतिमूर्छितं ८ पप्रच्छ करुणाविष्टः
कस्त्वं कस्माच्च मूर्छितः अशक्तवार्त्तैः सोवक्तुं दर्शयामास संज्ञया ९ जलं प्रायय मे प्राणा निःसरंति
न संशयः देवशर्म्मा स्वगम्याथ मुखे शीघ्रं जलं ददौ १० म्रियमाणमवेक्ष्याथ तुलस्यां मंजरीदलं ददौ मुखे
पुनस्तस्य प्राणांस्तत्याज तत्क्षणं ११ अथो यमभटैर्बध्वा दृढं पाशैरनीयत धर्मराजनियोगेन पुरीं
संयमनीं प्रति १२ यावद्यमभटा मार्गे तावद्विष्णुगणोहितं निवारितास्त्वयज ध्वंभो विष्णुलोकं ग
मिष्यति १३ यमभट उवाच पापराशिरयं दुष्टः कृपणो लोकनिंदकः यावज्जीवमसौ धर्मं न

दितः १

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

चकारसमंदधीः १४ विष्णुदूतउवाच सत्यमुक्तंभवद्भिर्हि एवमेवनसंशयः अंतकालस्यसंजज्ञेप
तोनिरयवारणं १५ यद्देवशर्मणादत्तंतुलसीमिश्रितजलं इत्युक्त्वाविष्णुदूतास्तेमोचयित्वाकुजन्म
कं १६ विमानवरमारोप्यनिन्युर्वैकुंठमंदिरं एवंविधःप्रभावोस्यास्तुलस्याद्विजसत्तमाः १७ कार्तिके
मार्गशीर्षेचतुलस्याःसेवनंवुधैः कार्यंदीपाःप्रदातव्याविष्णोःसंतुष्टिहेतवे १८ येचमूलेचशाखायांस
र्वेदेवाश्चसंस्थिताः विष्णोर्हिस्थावरंरूपंतुलसीनात्रसंशयः १९ देहेगेहेषुनात्यर्थंधूपस्त्वगरुसं
भवः नाशयेद्घ्नरक्षांसिधूपःसर्वरसोद्भवः २० नीराजनंतुयःकुर्याद्बलिभिर्वलिभिर्द्विजाः
तस्यतुष्टोहिभगवान्ददातिपदमव्ययं २१ विधिहीनंमंत्रहीनंकृतंयत्पूजनंहरेः सर्वंसंपूर्णता
मेतिकृतेनीराजनेद्विजाः २२ यःकरोतिसहोमासेकर्पूरेणचदीपकं अश्वमेधफलंप्राप्यकुलंचै १०
वसमुद्धरेत् २३ हरेर्गृहेद्विजानांचतुलस्याश्चचतुष्पथे घृतेनवाथतैलेनदीपंप्रज्वालयेन्नरः हो॰मा॰ २८

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

मेधावीज्ञानसंपन्नोदीप्तिमानजायतेनरः तेचनिर्वीयदेयस्तुसयातेन्नरकेध्रुवं २५ नानाव्यंजनसंयु
क्तंरसषड्भिस्तुसंस्कृतं निवेद्यान्नंसमाप्नोतिफलंयज्ञाधिकंद्विजाः २६ हरेर्न्निवेद्ययद्भुंक्तेसज्ञेयोवै
ह्यमेवोत्तमः अनिवेद्यसमश्नातियःसपापंसमश्नुते २७ सिक्थेसिक्थेयज्ञफलंनैवेद्यान्नेनसंप्राप्यः
पूंगीचूर्णंचखदिरंतांबूलंदापयेत्सुधीः २८ स्नानार्च्चनक्रियाकालेतथोत्थानेचभोजने नीराजनेच
यःकुर्व्वीतघंटावाद्यंसपुण्यभाक् २९ कृत्वानृत्यंचगीतंचतारयेन्नरकात्पितॄन् समर्प्यमुकुटादी
निभूषणानिविचक्षणाः ३० पुष्पांजलिंतथाऽऽदर्शनिवेद्यछत्रचामरे ध्यात्वानारायणंभक्त्याजपे
दष्टोत्तरंशतं ३१ अष्टोत्तरसहस्रंवाशुचितःशुद्धमानसः शस्तारौप्यमयीमालाकांचनीस्फाटिकीत
था ३२ पद्माक्षैश्चैवरुद्राक्षैर्विद्रुमैर्म्मणिभिर्मौक्तिकैः इंद्राक्षैस्तुलसीकाष्ठैस्तथैवांगुलिपर्वभिः ३३
नचक्रमणंनचहसनंनपार्श्वमवलोकयन् जपकालेनभाषेतव्रतहोमादिकर्म्मसु ३४ नचव्यग्रधि

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

धिपाकार्प्येनाऽसंख्यातः कदाचन ॥ असंख्यातो वृथाजाप्यस्तत्पाव्यगतधिपाकृतः ३५ गृहेत्वेकगुणं
प्रोक्तं नद्यां तद्द्विगुणं जपं ॥ गवां गोष्ठे दशगुणमग्न्यागारे शताधिकं ३६ तीर्थादिषु सहस्रं स्यादनंतं विष्णु
सन्निधौ प्रदक्षिणां ततः कृत्वा दंडवत्प्रणमेद्धरिं ३७ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा तथा
मनसा वचसा दृष्ट्या प्रणामोऽष्टांग उच्यते ३८ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं प्रपन्नं पाहि
मामीश भीतं मृत्युभवार्णवात् ३९ गीतं नृत्यं च वाद्यं च तथा पुस्तकवाचनं पूजाकाले चतुर्वक्त्र सर्वदा
चममप्रियं ४० इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये नाम नवमोऽध्यायः ९ हरिरुवाच ॥ एका
चंड्यां रवौ सप्त तिस्रो दद्याद्विनायके चत्वारि केशवे दद्यात् शिवे चार्धप्रदक्षिणां १ अष्टोत्तरशतं दे
न कृतां भक्त्या प्रदक्षिणाः तेनेष्टं क्रतुभिः सर्वैः समाप्तवरदक्षिणैः २ प्रदक्षिणा कृता तेन सप्तद्वी
पा वसुंधरा ॥ अत्रैव नारदेनोक्तमितिहासं पुरातनं ३ वदतां शृण्वतां चैव सर्वपापहरं परं वैवस्वतं
तरे पूर्वं शक्रस्य च बृहस्पतेः ४ संवादः सुमहानासीत्तं तं वक्ष्ये शृणु तत्वतः एकदा स्वगुरुं शक्रः पप्रच्छ

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

विनयान्वितः ५ ज्ञातुं देवगणानां च वर्त्तते विस्मयान्वितः इंद्र उवाच इंद्रस्तु कीदृशः प्रोक्तो विबुधाः
कीदृशाः स्मृताः ६ तेषां [illegible] तत्कीदृशं कर्म्म मयावद्वक्तु महसि बृहस्पतिरुवाच स्वधर्म इति वि
ख्यातः कश्चिदास्ते पुरंदर ७ स एवैतद्विजानाति तं पृछामि मया तथं इति निश्चित्य शक्रोपि बृहस्पतिपु
रोगमः ८ देवतागणसंकीर्णः स्वधर्मं पृष्टवांस्तदा स्वधर्म उवाच चतुर्युगसहस्राणि ब्रह्मणो दिन
मुच्यते ९ तस्मिन्नेव दिने शक्र मनवस्तु चतुर्दश इंद्राश्चतुर्दश प्रोक्ता देवाश्च विविधाः स्मृताः १० स्वायंभु
वो मनुः पूर्वं ततः स्वारोचिषस्तथा उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ११ वैवस्वतो मनुश्चैव साव
र्णिरष्टमो मनुः नवमो दक्षसावर्णिः सर्ववर्णहिते रतः १२ दशमो ब्रह्मसावर्णिर्धर्मसावर्णिकस्तथा
ततस्तु रुद्रसावर्णी रोचमानस्ततः स्मृतः १३ भौत्यश्चतुर्दशः प्रोक्त इत्येते मनवः स्मृताः शचीपतिर्विप
श्चिच्च शांतिः प्रोक्तः शिवव्रतः १४ मनोजवः पुरंदरः शांतिर्वल [illegible] तक्रतुः [illegible] दिवस्पतिश्च
महत्वांश्च शुचिस्तथा १५ एते चतुर्दश प्रोक्ता इंद्राः स्वर्पतयः शुभाः कच्चारोव हव संति तत्संख्यां

दिवस्पतिश्च सुत्रामा २

मार्गशीर्ष० वेत्ति कोपि न १६ मयि स्थिते ब्रह्मलोके ब्रह्मणो बहवो गताः मम ज्ञानं दैववशात सुकृतं तच्छृणुष्व भो १७
गृहमासे पुराशाक गृध्रः पाप विशेषतः स्थितश्च भूमिमार्गे वै अमेध्यामिषभोजनः १८ एकोहं विष्णु
१२ गृहे प्राकारे संस्थितः प्रभो पतितो व्याधशरस्त्वेण गच्छन विष्णोर्गृहान्गतः १९ मयि कंठगते प्राणे लुब्धको
मांसलोलुपः पारदपातिवेगेन तावच्छ्वा मां गृहीतवान २० लुब्धकेन हतः श्वापि पृष्ठो वाणेन हतस्तव ताडितः ८
गतः प्रदक्षिणाकारं विष्णोस्तन्मंदिरे प्रभोः २१ तेनैं तुष्टिमापन्नो अंतरात्मा जगन्मयः ममचैवशुन
श्वापि दत्तवान परमं पदं २२ प्रदक्षिणाकारतया उभाभ्यामीदृशं फलं संप्राप्तं विबुधश्रेष्ठ किं पुनः स
म्यगर्च्चनात २३ स्वर्गकालमपि प्राप्य यावत्कालं शृणुष्व भो चत्वारो मनवो तीतां मम शक्र वसनं दि कुत्र
वि २४ स्थातव्यं च मया चैव युगकोटिसहस्रकं ततः परं गमिष्यामि कर्म भूमौ स्वकर्मतः २५ इत्यु १२
क्तो देवराजस्तु स्वधर्मेणा महात्मना मनसा प्रीतिमापन्नो हरेः पूजापरो भवत २६ अद्यापि निर्जराः

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

सर्वे भारते जन्म लिप्सवः समर्चयंति विबुधाः नारायणमतंद्रिताः २७ मानुषं जन्म संप्राप्य सर्वकर्मप्रसा
धकं श्रीहरिं नार्चयेद्यस्तु कोऽन्यस्तस्मादचेतनः २८ अहो चित्रमहो चित्रमति चित्रं मुनीश्वराः संस्थि
ते कामदे विष्णौ नरो याति हि यातनां २९ नारायणे जगन्नाथे सर्वकामफलप्रदे स्थितेपि ज्ञानसंपन्नाः
पच्यंते नरके त्वहो ३० त्वङ्मूत्रपुरीषे च शरीरेस्मिन्नशाश्वते मूर्छितं मांसरक्ताद्यैर्देहं संप्राप्य यो नरः ३१
संसारोच्छेदकं विष्णुं न भजेद्यः स पातकी अहो कष्टमहो कष्टमतिकष्टं तु मूर्खता ३२ स्वदेहान्निर्गतं दृष्ट्वा
मलमूत्रादि किल्बिषं उद्वेगं मानवाः मूर्खाः किं न कुर्वंति पापिनः ३३ अध्यात्मज्ञानलाभार्थी हरिभक्तिपरा
यणः लभते परमं स्थानं पुनरावृत्तिदुर्लभं ३४ यतो जातमिदं विश्वं यतश्चैतन्यमश्नुते यस्मिंश्च विल
यं याति जगदेतच्चराचरं ३५ निर्गुणोपि निरानंदो गुणवानपि भाति यः तं समभ्यर्च्य देवेशं संसारात्
परिमुच्यते ३६ तौ पादौ सफलौ पुंसां क्रमौ पतनगामिनौ तौ करौ भाग्यनिलयौ हरिपूजापरायणौ ३७

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

 तेचनेत्रेमहाभाग्येदृश्येतेचजनार्दनं साजिव्हाप्रोच्यतेभक्त्याहरिनामामृतंसदा ३८ तन्मनःसंवृतंविष्णो
स्तावाराणीततपरायणा तेश्रोत्रेतत्कथासारेफलितेलोकवंदिते ३९ असारेखलुसंसारेसारंपद्विस्सु
 पूजनं संसारपाशंसुदृढंमहामोहप्रदायकं ४० हरिभक्तिकुठारेणछित्वातंचसुखीभव विनोदेना
पिदंभेनमोह्याद्वाल्याच्छलादपि ४१ हरिंयोभजतेनित्यंसभक्तोनावसीदति पापपावकदग्धानांधर्म्मचे
ष्टाविहीनयोगिनां ४२ भेषजंनास्तिमर्त्यानांश्रीकृष्णस्मरणंविना प्रयागेवाप्रयागंगाशुक्लतीर्थेपुनर्म्मदा
४३ सरस्वतीकुरुक्षेत्रेतद्वच्छ्रीकृष्णकीर्त्तनं येमानवाःप्रतिदिनेपरिमुक्तसंगानारायणंगरुडवाहनमर्च्च
यंति तेसर्वकर्म्मनिगडैःपरिमुच्यभक्त्याविष्णोःपदंशुभतरंप्रतियांतितुष्टाः ४५ येमानवाहरिकथाश्रव
णास्तदेषास्ततपादपद्मविनिवेशितमानसाये तैवैपुनंतिजनतांस्मरणाच्चसंगात्संभावनादपिततोह १३
रिरेवपूज्यः ४६ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येनामदशमोध्यायः १० श्रीकृष्णउवाच एवंभ कृष्ण०
गवतःपूजांकृत्वापादोदकंपिवेत् शालग्रामशिलातोयंयःपिवेद्विंदुनासमं १ मातुस्तन्यंपुनर्नैवसभ

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

वेन्मुक्तिभाङ्नरः अंतकालेसमायाते दीयतेपादयोर्जलं २ सोपिस्वर्गतिमाप्नोतिकिंपुनःसर्वदापिबन् सदा
पूतोनरोयत्नुविष्णोःपादोदकं [illegible] पिबेत् ३ राजिकामाषकंक्षौद्रं तथामांसमसूरिकां मार्गशीर्षेव्रतं
कुर्वन्व्रतीनाघातकदाचन ४ वेदविद्द्विजजातीनांगृहगोव्रतिनांतथा स्त्रीराजमहतांनिंदांवर्जयेत्स
र्वदाव्रती ५ द्विदलंतिलतैलंचतथान्नंशल्यदूषितं भावदुष्टंक्रियादुष्टमन्नंपर्युषितंतथा ६ परान्नं
मामिषंचूर्णदुग्धादिघ्राणमाविकं द्विजक्रीताश्चरसालवणंभूमिजंतथा ७ ताम्रपात्रस्थितंगव्यंज
वि५ लंपल्वलसंस्थितं आत्मार्थेपाचितंचान्नंवर्जयेत्सर्वदाव्रती ८ लशुनंगृंजनंगुंदंछत्राकंबृहतीफलं मरकैटाः
नालकीमूलकंहिंगुंवृंताकंचकपित्थकं ९ अलाबुंचापिकूष्मांडं कलिंगंचविवर्जयेत् द्विपाचितंचदग्धान्नं
नैवाद्याद्वैष्णवव्रती १० कृच्छ्रादिकंप्रकर्तव्यंस्वशक्त्याविष्णुतुष्टये समस्तकरणाशक्तो कुर्यात्पंचदिना
त्मकं ११ हरिपंचकमाख्यातंपूर्णव्रतफलप्रदं नारीणांचनराणांचसर्वदुःखनिवर्हणं १२ धर्मार्थ

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

माहात्म्य० कामभोगार्थं पुरुषार्थैकसाधनं पंचामृतेन स्नपनं कर्त्तव्यं दिनपंचसु १३ तिलहोमश्च कर्त्तव्यस्तिलदानं च
मार्गशीर्ष० पंचसु षड्भिर्ब्राह्मणान् भक्त्या भोजयेद्वै स्वशक्तितः १४ अपवासपूर्त्तिं मासमेकां कृत्वा ततः फलमश्नुते शोभ
नं मंडपं कृत्वा वितानध्वजराजितं १५ स्तंभचामरघंटाद्यैर्वंदनैः फलपुष्पकैः शोभितं सद्मवस्त्रैश्च भूषणो
१४ रूपशोभितं १६ बहुदीपसमाकीर्णं कलशैश्च समावृतं तन्मध्ये सर्वतोभद्रं पंचवर्णविराजितं १७
हेम्ना वा रजतेनापि पाताम्रेणा कुंभकं लक्षाप्युतं च देवस्य प्रतिमां निष्कनिर्मितां १८ आभूष
णैश्च वस्त्रैश्च पात्रैः रत्नैः फलैरपि पूजयेद्देवदेवेशं व्रतसंपूर्णहेतवे १९ ग्रहयज्ञं पुरस्कृत्य होमं कु
र्याद्विधानतः दंपत्योर्वस्त्रयुग्मं च शय्यां गां च प्रदापयेत् २० ब्राह्मणान् भोजयेत् पश्चात् यथा
विभवमात्मनः अन्येभ्यो दापयेद्दानं स्वयं भुंजीत बंधुभिः २१ इति श्रीस्कंदपुराणे मार्गशीर्षमा १४
हात्म्ये व्रतनियमविधिर्नामैकादशोऽध्यायः ११ सूत उवाच अथेतिहासं वक्ष्यामि शृणु त्वं तु द्विज कृष्ण०

सत्तमाः कांपिल्ले नगरे राजा वीरवाहुरिति श्रुतः १ सत्यवादी जितक्रोधो ब्रह्मण्यो विष्णुतत्परः क्षमा
वांश्च दयाशीलो रूपवान्बलतत्परः २ भक्तो विष्णुपदाब्जानां चतुर्विद्यैकपारतः दाता विद्वान्ध
नैर्युक्तो वाग्मी च निर्जितेंद्रियः ३ विजयी रणमध्ये स्व सम्मुखे धनदोपमः पुत्रवान्पशुसंपन्नः
स्वदारनिरतः सदा ४ तस्य भार्या कांतिमती रूपेणाप्रतिमा भुवि पतिव्रता महासाध्वी विष्णुभ
दपा क्तिपरायणा ५ तया सह विशालाक्ष्या बुभुजे मेदिनीं पुरा एकदा पर्य्यटन्भूमौ भारद्वाजो महा
मुनिः ६ समागतो गृहे तस्य वीरवाहोर्महात्मनः दृष्ट्वा समागतं राजा भारद्वाजं महामुनिं ७
स्वागतं कारयामास दत्त्वार्घ्यं विधिवत्तदा आसने कल्पयामास स्वयमेव महीपतिः ८ प्रस
न्नपरया भक्त्या तस्थौ मुनिवराग्रतः राजोवाच विपुला मे कथं लक्ष्मीः किं कृतं पूर्वजन्मनि ९
कोऽहं मुने कथं चैषा का वा धर्म्मः कृतो मया इति पृष्टो नरेंद्रेण भारद्वाजोऽब्रवीद्वचः १० शृणु

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

मार्गशीर्ष० भूपालस्त्वकलंपश्यस्वदंकर्म्मणःफलं त्वमासीच्छूद्रजातीयोजीवहिंसापरायणः ११ नास्तिकोदुश्च
चरितःपरदारप्रधर्षकः कृतघ्नोदुर्विनीतश्चशिष्टाचारविवर्जितः १२ याचेयं भवतोभार्यापूर्वम
१५ प्यादृतेक्षणा कर्म्मणामनसावाचानान्यस्मिन्हस्त्वयाविना १३ कुकर्म्मफलपाकेनदारिद्रीत्ववसन
पुरे नकोपिपृच्छतेवार्त्तांनत्वामेषापरित्यजेत १४ तेहीनःसर्वकामभ्योगतवान्निर्ज्जनेवनं जीरवो
तपरोनित्यंकंदमूलफलादकः १५ त्वयैकदावनेदृष्टोब्राह्मणःक्षुत्तृषावृतः पतितोवनमध्येतुमा
र्गभ्रष्टोमहीपते १६ दयाजाताचतेवक्त्रीदृष्ट्वादुःखेनपीडितं ब्राह्मणंस्वकरेणैवपतितंधरणीतले १७
उत्थाप्यवृद्धमज्ञातंत्वयोक्तंहितदानृप प्रसादंकुरुविप्रर्षेत्यागच्छतेममालयं १८ जलपूर्णंतडा १५
गंचपद्मिनीखंडमंडितं वृक्षैर्म्मनोहरैर्युक्तंफलैःपुष्पैःप्रपूरितं १९ स्नात्वासुशीतलेतोयेकृ
त्वाकर्म्मचनैत्यकं कुरुविप्रफलाहारं पिबवारिसुशीतलं २० लब्धसंज्ञस्तदाविप्रःश्रुत्वास्रद्र क्रम०

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

स्वभाषितं करे जग्राह तं शूद्रं गतो पत्र जलाशयः २१ छायामाश्रित्य संस्थित्वा स्नात्वा पूज्य गुरे
श्वरं विश्रांतो वृक्षमाश्रित्य शिवशर्म्मा द्विजोत्तमः २२ एवं संतोष्य तं विप्रं तां भार्यां स्वामुवाच ह अ
हो फलानि स्वादूनि प्रपक्वान्यस्मै द्विजातये २३ विप्र उवाच त्वामहं नाभिजानामि स्वजातिं कथयस्व
मे नाज्ञातस्य तु भोक्तव्यं ब्राह्मणस्यापि निश्चयः २४ शूद्र उवाच शूद्रोऽहं द्विजशार्दूल नकार्यैः सं
श्रयस्त्वया आत्मीयैर्दुर्जनैर्विप्र परित्यक्तः स्वबंधुभिः २५ तयोः संवदतोरेवं शूद्रपत्नी फलानि च
दत्तानि तस्मै विप्राय तेन भुक्तानि तानि च २६ अमृतप्रीतमना विप्रः पीत्वा नीरं सुशीतलं सुखं संप्राप्य
स मुनिर्विश्रांतस्तरुमूलके २७ स च शूद्रो मुनिं प्राह कुतः आगमनं त्विह श्रुत्वा प्राह द्विजः शूद्रं तीर्थ
यात्राप्रसंगतः २८ आगतोऽहं वने घोरे जीवरक्षा कृता त्वया भवानपि कुतः प्राप्तो निर्मनुष्ये वने वद २९
को भवान् कारणं किंच यस्मात्त्वमिह चागतः इति द्विजवरेणोक्तः शूद्रको वीरबाहुः समुदितनिजभाग्यो

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

 विप्रसंगप्रसंगात् कृतकलुषविपाके निर्भरं जातचित्तः कुमतिकृतमशेषं कर्म्मभूयोविभाषे ३१ इति
 श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये वीरबाहुनृपेतिहासेनामद्वादशोऽध्यायः १२ श्रीभगवानुवाच
शूद्रउवाच विदर्भनगरी राज्ञा भीमसेनेन पालिता तस्य राज्ये वसन् विप्र शूद्रोऽहं पापतत्परः १ त्य
क्तोऽहं बंधुवर्गेण ततो वनमिहागतः मम पूर्वसमाचारं वद विप्र स्वध्यानतः २ विप्रउवाच पूर्वजन्म
नि विप्रस्त्वमभवस्त्वं धर्म्मतत्परः स्वकर्म्मनिरतो नित्यं सुशीलस्त्व सदाव्रती ३ एका चैकादशी विष्णोः
कृता पश्चामिका पुरा तस्याः पापप्रभावेन समस्तं सुकृतं गतं ४ तेन शूद्रो भवान् जातः पापासक्तमतिः स
दा आसीज्जे पुत्रिका चैका विदर्भनगरे शुभा ५ कृतं तया विधानेन हरेरेकादशीव्रतं मरणावसरे द
त्तं तु मम पुण्यं व्रतोद्भवं ६ तेन पुण्यप्रभावेन पापं जन्मशतोद्भवं इहजन्मनि यत्पापं कृतं तद्विलयं ग १६
तं ७ आतिथ्यं तु कृतं शूद्र शुद्धप्रभावेन मतत्वया तेन पुण्यप्रभावेन [redacted] विमलो हृस्म०

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

कंगमिष्यसि ८ भारद्वाजउवाच तयोःसंवदतोरेवंविष्वक्सेनःसमागतः उवाचपुंडरीकाक्षःसंतु
ष्टस्तंचशूद्रकं ९ विष्णुरुवाच ग्रातिथ्यस्यप्रभावेनतुष्टोहंत्वयिशूद्रक पत्न्यासहमहाभागविमा
नेमेसमारुह १० सश्रुत्वाभगवद्वाक्यंविमानोपरिसंस्थितः स्वर्गंगतःसपत्नीकःशूद्रोधर्म्मप्र
सादतः ११ शिवशर्म्मातुविप्रोपस्तीर्थराजंमपोततः भारद्वाजउवाच एतत्तेसर्वमाख्यातंयत
पृथ्वीमीरितं त्वयापरिपृच्छच १२ शूद्रोगत्वाविष्णुलोकंभुक्त्वाभोगांश्चपुष्कलान प्रजानांपालनार्थायप्रभुवि
एजत्वमागतः १३ एकादश्युद्भवात्पूर्वजन्मपुण्यविचेष्टितात तत्रराजकुलेजन्मविष्णुभक्तिस्तथा
दृढा १४ विष्णुभक्तिमतीभार्य्याराज्यंनिहतकंटकं राजोवाच सम्यक्कथयविप्रएकादश्याव्रतं
शुभं १५ उद्यापनविधिंचास्याश्चखंडत्वंव्रतस्यच भारद्वाजउवाच मार्गशीर्षेसमारभ्यकर्त्तव्यंव्र
तमुत्तमं १६ शुक्लेपक्षेविशेषेणपापावृद्धैसमापयेत आदौमध्येतथाचांतेव्रतस्योद्यापनंचरेत १७

भो ३

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

उद्यापनं न कुर्याद्यः कुष्ठी वा चांधको भवेत् तस्मादुद्यापनं कुर्याद्यथाविभवशक्तितः १८ द्वादशान्
ब्राह्मणांश्चैव आमंत्र्य विधिकोविदान् चैवोदक्षं सपत्नीकमाचार्यं विधिकोविदं १९ यजमानः शुचिः
स्नात्वा ग्रहयज्ञयुक्तो विधानतः फलद्रव्यासनैर्वस्त्रैराचार्यादीन्प्रपूजयेत् २० संलिख्य सर्वतोभद्रं त
न्मध्ये कलशं न्यसेत् जलपूर्णं सवस्त्रं च पंचरत्नसमन्वितं २१ पंचपल्लवसंयुक्तं कर्पूरागरुवासितं वे
ष्टितं पुष्पमालाभिस्ताम्रपात्रेण संयुतं २२ प्रस्थप्रमितकं कुंभं पात्रे प्रस्थार्द्धसंमितं तस्योपरि न्यसे
द्देवं लक्ष्मीनारायणं नृप २३ सौवर्णीं प्रतिमां कुर्याद्यथाशक्तिप्रमाणतः वाहनायुधसंयुक्तं वित्तशा
ठ्यं विवर्जयेत् २४ ततो मंडलदिग्भागे दिक्पालानपि पूजयेत् कदलीस्तंभसंयुक्तं सवितानं सतोरणं २५
बहुपुष्पफलाढ्यं च मंडपं कारयेद्बुधः ग्रहयज्ञं पुरस्कृत्य होमं कुर्याद्विधानतः २६ पयस्विनीं च गां दद्या
त्सुवर्णशृंगादिभूषितां दंपत्योर्भूषणं वस्त्रं पात्रं शय्यां प्रकल्पयेत् २७ त्रिंशत्कुंभांश्च संदद्या[illegible]द्धस्व
हिरण्याकसंयुतान् सतांबूलफलं दद्यान्ब्राह्मणेभ्यः प्रयत्नतः २८ चैवोदशभ्यो विप्रेभ्यस्त्वपोदनाप

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

दानिच पंचाशच्छ्रोद्विजेभ्यश्च भोजनं मिष्टमाचरेत् २९ पारणं च ततः कुर्याद्बंधुभिर्मिष्टभोजनं वित्तशक्ति
गृहे नास्ति कृतं चैकादशीव्रतं ३० स्वशक्त्या सर्वकार्याणि कुर्यादुद्यापनादिकं जागरे चाकृते विष्णोर
कृते चैव पूजने ३१ उपवासादिकं सर्वमंगहीनं भवेद्ध्रुवं यामे यामे हरेः पूजां कुर्याज्जागरणे व्रती ३२
षडंगगुणसंयुक्तं पूजनं जागरं चरेत् गीतं वाद्यं च नृत्यं च पुराणपठनं स्तवं ३३ सत्ये स्थितिर्दमः क्षमादि
षप्रत्याग एव च पात्रे दानं चोपचारैः षोडशैः संयुतं चरेत् ३४ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये उद्या
पनविधिर्नाम त्रयोदशोऽध्यायः १३ सूत उवाच एवमुक्त्वा भरद्वाजो वीरबाहुं नरेश्वरं जगाम च मुनिर्वि
प्रो विष्णुभक्तः स्वमाश्रमं १ तदारभ्य परा जातो विष्णुभक्तिरतोऽभवत् एकादशीं विधानेन चकार सुस
माहितः २ इह भुक्त्वाऽखिलान्भोगान्परलोकमनुत्तमं रत्नयुक्तविमानेन समारुह्य हरिं व्रजेत् २
एकादश्यास्तु माहात्म्यं शृण्वंतु मुनिसत्तमाः संवादं भद्रशीलस्य तत्पितुर्गालवस्य च ४ पुराहि गा

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

ल्वोनाममुनिःसत्यपरायणः सुरम्येनर्मदातीरे शांतोदांतस्तपोनिधिः ५ कंदमूलफलैःकीर्णेमुनि
वृंदसुसेविते गालवोनामविप्रेंद्रोनिवासमकरोच्चिरं ६ तस्याभवद्भद्रशीलइतिख्यातःसुतोवली जाति
स्मरोमहायोगीनारायणपरायणः ७ बालक्रीडनकालेपिभद्रशीलोमहामतिः मृदाचदेवप्रतिमांकृ
त्वापूजापरोभवत् ८ सर्वांश्चबोधयंल्लोकान्विष्णुःपूज्योनरैरिह एकादशीव्रतंचैवकर्त्तव्यंमतिपंडितैः ९
एवंसुचरितंदृष्ट्वातनयंगालवोमुनिः अपृच्छद्विस्मयाविष्टःसमाभाष्यतपोनिधिः १० गालवउवा
च भद्रशीलमहाभागभद्रशीलोसिपुत्रक चरितंमंगलंयत्तेयोगिनामपिदुर्ल्लभं ११ हरिपूजापरोनि
त्यंसर्वभूतहितेरतः एकादशीव्रतपरोलोकानुग्रहतत्परः १२ निर्द्वंद्वोनिर्म्मलःशांतोहरिध्यानप कृस०
रायणः जातेयंपरमाबुद्धिःकथंतद्वक्तुमर्हसि १३ भद्रशीलउवाच अहमासंपुरातातराजासोमकु १८
लोद्भवः वर्षकीर्त्तिरितिख्यातोदत्तात्रेयेनशासितः १४ प्राप्यराज्यंमहाभागमहींकृत्स्नामपालयं

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

पाखंडजनसंसर्गात्पाखंडचरितं मम १५ पुरार्जितानि पुण्यानि मया तु सुबहून्यपि पाखंडालापमात्रेण प्र
नष्टानि तपोधन १६ अधर्मनिरतं मां तु दृष्ट्वा मद्देशजाः प्रजाः सर्वे वै दुष्कृतं चक्रुः षडंशस्तत्र मे भवत् १७
मृगयाभिरतो भूत्वा त्वेकदा प्राविशद्वनं ससैन्योहं वने तस्मिन् हत्वा बहुविधान् मृगान् १८ अदृष्टसैन्या
स्त्वेकाकी पीड्यमानः क्षुधा भृशं प्रवृद्धतापविक्रांतो रेवातीरमुपागमं १९ तत्र केचित् समेतास्तु तात
तीरनिवासिनः एकादशीव्रतपरा मया दृष्टा निशामुखे २० निराहारश्च तत्राहमेकाकी तज्जनैः सह
जागरं कृतवांस्तत्र सनपारहितस्तदा २१ अध्वश्रमपरिश्रांतः क्षुत्पिपासाप्रपीडितः तत्रैव जागरांते
हं तात पंचत्वमागतः २२ ततो यमभटैर्बद्धो महादंष्ट्राभयंकरैः अनेकक्लेशमार्गेण प्राप्तस्तत्र यमांति
६८ कं २३ अथ कालश्चित्रगुप्तमाहूयेदमभाषत अस्य शिक्षाविधानं च यथावद्वद पंडित २४ एवमु
क्तश्चित्रगुप्तो धर्मराजेन सत्तमः चिरं विचारयामास पुनश्चेदमभाषत २५ अहो पापरतः सत्यं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

माहात्म्य० तथापिशृणुधर्म्मज्ञ एकादश्यांनिराहारात्सर्वपापैर्विमोचितः २६ यानिकानिचपापानिकृतानिसुव
मार्गशीर्ष० हून्यपि तानिसर्वाणिनश्यन्तिउपवासप्रसादतः २७ पूजयामासमांतत्रभक्तिभावेनधर्म्मराट् यदा
१९ हिचित्रगुप्तेनबोधितोविधिवन्मुने २८ धर्म्मराजउवाच शृणुत्वंतुमद्वचोदूताहितंवक्ष्याम्यनुत्तमं धर्मेषु
निरतान्मर्त्यान्त्यजध्वंममांतिकं २९ येविष्णुभक्तिनिरताःप्रयतःकृतज्ञाएकादशीव्रतपराविजितेंद्रियाः
श्च नारायणाच्युतहरेशरणंभवेतिशांतावदंतिसततंखलुतान्त्यजध्वं ३० स्वाचारमार्गनिरतान्गुरुसेव
कांश्चसत्पात्रदाननिरतान्हरिभक्तियुक्तान् पाखंडसंगरहितान्द्विजदेवभक्तान्दूतास्त्यजंतुनितरांहरि
नामसक्तान् ३१ नारायणाच्युतजनार्द्दनकृष्णविष्णोपद्मेशपद्मदपितःशिवशंकरेति नित्यंवदंत्यखि
ललोकहितोःप्रशांताःश्रुत्वाभटास्त्यजततत्रनमेस्तिशिक्षा ३२ वेदोक्तमार्गनिरतान्द्विजदेवनिष्ठानसत १९
संगलोलुपतरांश्चतथातिथेयान् शंभोर्हरेश्चसमबुद्धिसमांस्तथैववीक्ष्यत्यजध्वमुपकारपरानजना कृ स्म०
नां ३३ येवीक्ष्यकाहरिकथामृतसेवकैश्चनारायणास्मृतिपरायणमानसैश्च विप्रेंद्रपादजलसेवन

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

संपूहेस्तान्पापिनोपिचमहाःसततंत्यजध्वं ३४ येमानृतातपरिभर्त्सिनशीलिनश्चलोकहपःद्विजजना
२हितकारिणश्च देवस्वलोभनिरतानजननाशहेतूंस्तानोनयध्वमपराधकृतांश्चदूताः ३५ एकादशीव्रतप
एश्चसुखमुग्नशीलंलोकापवादनिरतंपरनिंदकंच ग्रामप्रतिग्रहपरंभवनानुरक्तंतंचानयध्वमविचिंति
तमाशुवीराः ३६ भद्रशीलउवाच एवंसंश्रुतवान्पूर्वंयमेनपरिभाषितं दत्त्वैवमनुतापेनस्मृत्वाहंकमंतत्रवै २७
ततःसंपूज्यमांकालेविमानशतसंकुले सद्यःसंप्रेषयामासतद्विष्णोःपरमंपदं ३८ कल्पकोटिसहस्राणि
कल्पकोटिशतानिच स्थित्वाविष्णुपदेपश्चादिंद्रलोकंसमागतः ३९ तत्रापिसर्वभोगाढ्यःसर्वदेवनमस्कृतः
तावत्कालंदिविस्थित्वाततोभूमिंसमागतः ४० अत्रापिवैंकुलेजातोजातिस्मरणशीलकः अवशेनापिप
तकर्मैकृतंतेतस्यैदृशंफलं ४१ एकादशीव्रतंभक्त्याकुर्वतांकिमुतप्रभो तस्माच्चारिष्यजनकसदाचैकादशी
व्रतं ४२ विष्णुपूजामहरहःपरमस्थानकांक्षया एवंपुत्रवचःश्रुत्वासंतुष्टोगालवोमुनिः ४३ अत्रापप

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

 रमांतुष्टिंमनसाप्यतिहर्षितः सर्वभूतमयोविष्णुःपरिपूर्णःसनातनः ४४ इत्यभेदापरस्यभक्तिःसापूजाप
रिकीर्तिता ४५ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येगालवभद्रशीलसंवादेनामचतुर्दशोऽध्यायः १४ सूत
 उवाच अन्यच्छ्रेयोविधातार्थेयेर्च्चयंतिजनार्द्दनं सापूजानुमहाभागाःपूजकानांत्युहंतिवै १. हरिपूजाप
रोयस्तुयदिपापंकरोत्यसौ तमेवविष्णुद्वेष्टारं प्राहुस्तत्वार्थकोविदाः २ येविष्णुभक्तिनिरताः लोका
नुग्रहतत्पराः सर्वभूतदयायुक्ताविष्णुरूपाःप्रकीर्तिताः ३ कोटिजन्मार्जितैःपुण्यैर्विष्णुभक्तिःप्रजाय
ते दृढबुद्धिमतांविप्राःपापबुद्धिःकथंभवेत ४ अत्रैवोदाहरंतिस्मइतिहासंपुरातनं पठतांशृण्वतांचैव
सर्वपापप्रणाशनं ५ विप्राःशृणुध्वंचरितंयज्ञमालिसुमालिनोः कश्चिदासीत्पुराविप्रोब्राह्मणोरैवतोत्तरे ६
देवमालिरितिख्यातोवेदवेदांगपारगः सर्वभूतदयायुक्तोहरिपूजापरायणः ७ पुत्रमित्रकलत्रार्थंधनार्ज
नपरोऽभवत् चांडालाद्यैरपितथाप्रतिग्रहरतोऽभवत ८ तपसोविक्रयंचक्रेतथाचरसविक्रयं परार्थे

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

तीर्थगमनं कलत्रार्थमकारयत् ९ कालेन गच्छता विप्रा जातौ तस्य सुतावुभौ वज्रमाली सुमाली च
समानौ वृतिशोभितौ १० ततः पिता कुमारौ तौ वृतिचिह्नसमन्वितः योजयामास वात्सल्याद्भूमिः
साधनैस्तथा ११ बहुपापैर्देवमालिर्धनं संप्राप्य वन्ततः स धनं गणयामास कियत्स्यादिति वेदि
तुं १२ निष्ककोटिसहस्राणां कोटिं कोटिगुणान्वितं विगणय्य स्वदेहस्थो विस्मितश्चाप्यचिंतयत् १३
स्वयं च भागषष्ठं तु यमर्जितवान्वहरत् शेषं च भागषष्ठं तु पुत्रयोरुभयोरपि १४ प्रपातडागारा
मांश्चतथा देवगृहान्बहून् अन्नादीनि च दानानि सर्वतः कारयेत् सुधीः १५ नरनारायणा
स्थानं जगाम तपसे वनं शांतं पराशरं तिं शांतं जानंतिं मुनिसत्तमं १६ दृष्ट्वा ननाम तं मूर्ध्ना क
ल्पयामास चाहणं कंदमूलफलाद्यैश्च स नारायणाधिपातदा १७ मामुध्दरस्वेत्युवाचेदं ज्ञान
दानेन सत्तम उवाच प्रहसन्वाणीं देवमालिं गुणान्वितं १८ जानंति स उवाच भजनित्यं परं विसं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

माहात्म्य० त्यजन्मूर्खसमागमं कामंक्रोधंचलोभंचमोहंचमदमत्सरौ १९ परित्यज्यात्मविल्लोकंगत्वाप्राप्नोतिग
मार्गशीर्ष० मिष्यसि देवतायतनेनित्यंसन्मार्ज्जनविलेपनं २० कंदमूलफलैर्वापिसदापूजयमाधवं प्रदक्षिणा
२१ नमस्कारैःस्तोत्राणांपठनैस्तथा २१ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येदेवमालीतिहासेपंचदशो
ऽध्यायः १५ जानंतिरुवाच पुनर्धर्मान्प्रवक्ष्यामिलोकानांहितकाम्यया त्वंशृणुष्वमहाबुद्धेपाप
राशिविनाशकान् १ रोगिणोब्राह्मणान्साधूनन्यानप्यनाथ्यपालरक्षति सहस्रकुलसंयुक्तो
वसेद्विष्णुपुरेयुगं २ कर्म्मणामनसावाचायोरक्षत्यातुरंजनं सर्वान्कामानवाप्नोतिसर्वपापविव
र्जितः ३ योददातिद्विजश्रेष्ठनिवासंब्राह्मणस्यतु तस्यप्रसन्नोभगवान्प्रसन्नाःसर्वदेवताः ४ स्कं०
सुश्रेष्ठायब्राह्मणायपोदद्यात्कांपयस्विनीं सयातिविष्णुभवनेपुनरावृत्तिदुर्ल्लभं ५ श्रेयेभ्यःप्र २१
तिगृह्यापियोदद्यात्कांपयस्विनीं तस्यपुण्यफलंवक्तुंनातिशक्तोस्मिपंडित ६ कपिलांवेदविदुषे

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

दयाकुमपतो मुखीं तस्य पुण्यफलं वक्तुं कः समर्थो भवेद्बुधः ७ यो दद्यादभयं नृणां भयविकलचेतसां
तस्य पुण्यं समाख्यातुं न क्षमो ब्दशतैरपि ८ एकतः क्रतवः सर्वे समग्रवरदक्षिणाः एकतो भयभीतस्य
प्राणिनः प्राणरक्षणं ९ वस्त्रदो विष्णुभवनं कन्यादो ब्रह्मणः पदं हेमदो रुद्रभवनं प्रयाति कुलसंयुतः १०
प्रयाति चंद्रभवनं भिक्षुदानाद्विजोत्तम गंधदः पुष्पफलदः सूर्यलोकं हि गच्छति ११ त्रीण्याहुरति
दानानि गावः पृथ्वी सरस्वती नरकादुद्धरंत्येव दोहनाद्वापनाज्जपात १२ ब्रह्मांडकोटिदानेन यत्फलं
लभते नरः तत्फलं समवाप्नोति शिवलिंगप्रदानतः १३ शालग्रामशिलादानात ततो पि द्विगुणं फलं
स्वर्णविद्रुमदानेन मौक्तिकैः सोमसन्निधिं १४ वैडूर्यदो रुद्रलोकं पद्मरागप्रदस्तथा ध्रुवलोक
हीरा मवाप्नोति वज्रदानेन मो द्विज १५ अलंकारप्रदानेन सर्वत्र सुखमश्नुते प्रयाति यानदानेन विमा
नारोहितो नरः १६ वारुणं लोकमाप्नोति लवणस्य प्रदानतः सर्वभूतहितात्पेतुपरवादपराङ्मुखाः १७

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

परस्त्रीसंगविमुखोनपश्यंपतितमालयं परनिंदापरद्रव्यपरदारविवर्जितः १८ गंगायाह्नकेदागत्य
मामयंपावयिष्यति कर्त्तुतद्गंगायोमर्त्यः साधकः शंकितोभवेत् १९ सोपितत्फलमाप्नोतितद्वत्
यद्रदश्ववत्: मृदंतिलार्ध्यमात्रंवातद्गंगायाः समाहरेत् २० वसेद्दिव्याब्दपंचाशद्विमुक्तः पापको
टिभिः देवतायतनेयस्तुकुरुतेकारयत्यपि २१ शिवस्यवाहरेर्वापिसत्यलोकाधिभाग्भवेत् स
र्वलोकोपकारार्थंपुष्यारामंकरोतियः २२ तस्ययावंतिपत्राणिकुसुमानिभवंतिहि तावत्कालंव
सेत्स्वर्गेपातकोटिकुलान्वितः २३ यस्यगेहेपुराणानिविष्णुशास्त्रकाणिच प्रवर्त्तंतेसदासद्म
तद्वैकुंठसमंभवेत् २४ तस्मात्सर्वप्रयत्नेनश्रोतव्यमतिचादरात् यस्मादज्ञांधकारेहिपु २२
राणंदीपउच्यते २५ इतिहासंसमग्रंयः शृणोतिविधिवन्नरः कल्पकोटिंवसेत्स्वर्गेनात्र माहात्म्य०
कार्याविचारणा २६ कार्यंरामायणंयस्तुशृणुतेश्रद्धयानरः वाचकंपूजयेद्भक्त्यासोह

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

विश्रांत १

रेस्तनुमावेसेत २७ ममेतिगदितंयच्चतदपिभ्रांतिरुच्यते अहंकारोमनोधर्मस्त्वात्मनोनहिवि
क्रिया २८ नामजात्यादि शून्यस्यकथंजातिश्चनामच अपरिछिन्नभावस्यकथ्यतेचकथंक्रि
या २९ अनंतस्या क्रियस्यास्यकथंजन्मकथंक्रिया एवंप्रबोधितस्तेनदेवमालिमुनीश्वरा: ३०
तुसं वाराणसींप्राप्यपरंमोक्षमवाप्नुयात ३१ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येवेदमालीतिहासव
र्णनोनामषोडशोऽध्याय: १६ सूतउवाच देवमाले:सुतौप्रोक्तौयावुभौमुनिसत्तमा: यज्ञमालीसुमा
लीचतयो:कर्म्मोऽधुनोच्यते १ तयोर्ज्येष्ठोयज्ञमालीविभज्यपितृसंचिते तयोर्धनंद्विधाकृत्वाभाग
मेकंददौतदा २ सुमालीतद्धनंसर्वंव्यसनाभिरत:सदा गीतवाद्यरतोनित्यंपरदाररतस्तथा ३ मद्यपानरतो
नित्यंघूतकर्म्मरतोऽभवत दृष्ट्वासुमालिन:शीलंयज्ञमालीमहामति: ४ बभूवदु:खितोगाढमनुजंचेदमब्रवी
त अलमत्यंतपापेनवृत्तेनानुजमत्कुले ५ त्वमेकएवदुष्टात्मामहापापरतोभव: एवंनिवार्यमाणोपिचवह

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

श्रो भ्रातरं ततः ६ हनिष्यामीति निश्चित्य खड्गं धृत्वा कचे गृहीत ततो हाहारवो जज्ञे नगरे मुनिसत्तमाः ७
वंधुर्न्नीगरश्चैनं कुपितास्तं सुमालिनं अमेधात्मा वज्रमाली पौरान् संप्राप्य दुःखितः ८ वैध
नान्मोचयामास भ्रातृस्नेहविमोहितः वज्रमाली पुनश्चापि विभिदे स्वधनं द्विधा ९ आददत्स्वमेव
वार्द्धं ददावर्द्धं कनीयसे सुमाली त्वतिमूढात्मा तद्धनेनापि सत्तमाः १० पूर्वैः पाखंडचांडालैर्बुभुजे
समदोद्धतः असतामुपभोगाय दुर्ज्ञानानां विभूतयः ११ कल्पवृक्षफलं सर्वं मर्मरैरेव भुज्यते वज्र
माली सुमाली च त्वेककाले मृतौ द्विजाः १२ वज्रमालिनमानेतुं विष्णुः प्रेषितवान् गणान् गच्छन्नवि
ष्णुपुरं दिव्यमनुजं पथि दृष्टवान् १३ ताड्यमानो यमभटैः क्षुत्तृषापरिपीडितं कोयं भटैस्ताड्यमा
न इत्यपृच्छत् कृतांजलिः १४ अथोते हरिदूतास्तं संप्रोचुर्वज्रमालिनं असौ सुमाली भ्राता ते पापात्मा
दुष्टचेतनः १५ वज्रमाली समाकर्ण्य त्याख्यातं विष्णुकिंकरैः मनसा दुःखमापन्नः पुनः १६

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

द्धवेगतः १६ कथमस्यभवेन्मोक्षोवहुभिःपापसंचयैः वदंतुतदुपायंमे शीघ्रंभूतंहितबांधवाः १७
सत्यंसप्तपदीनंस्यादित्याहधर्म्मकोविदः ततोवैहरिदत्ताख्यंतमूचुर्द्विजमालिनं १८ कृतंतुसुमहत
कर्म्मभवतापूर्वजन्मनि पुरात्वंवैश्यजातीयोनाम्नाविश्वंभरःस्मृतः १९ त्वयाकृतानिपापानि
महांत्यगणितानिवै त्वमेकदाजनैस्त्यक्तःक्षुत्तृषापरिपीडितः २० हरेरायतनंगत्वाकेनचित्शुभकर्म
णाः विपाकेनमहाभागस्त्वयुक्तामनपालयः २१ तत्रवृष्टिसमुद्भूतंकर्दमंहातुमिच्छया निवारित
स्त्वयासोपितदुपलेपनतोगतः २२ उपोषितश्चतद्रात्रौतस्मिन्देवालयेद्विजाः सर्पेणदंशितस्तत्र
प्राप्तःपंचत्वमेवसः २३ तेनपुण्यप्रभावेनउपलेपनजेनते विप्रजन्मचतत्रापिहरिभक्तिरचंचला २४
कल्पकोटिशतंस्थागंतासिविष्णुहरिसन्निधौ तत्रैवज्ञानमासाद्यपरंमोक्षमवाप्स्यसि २५ अनुजेपा
परूपंहिअस्त्वेहि[illegible]द्विजसत्तम उपायंतुप्रवक्ष्यामितच्छृणुष्वमहामते २६ इहजन्मकृतंपुण्यं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

दत्वोप्युरद्विजोत्तम मार्गशीर्षे कृतं स्नानं प्रातःकाले विधानतः २७ एवमुक्तस्ततस्तेन यज्ञमालीदयापरः
देवदूतोक्तमात्रस्तु ददौ तस्मै फलं तदा २८ विनष्टमभवत्तस्य पापजालं मुनीश्वराः विमानमागतं सद्यः
सर्वभोगसमन्वितं २९ समारुह्य सुमाली च मुमुदे देववत्तदा एवं प्राप्य हरिः सारूप्यं यज्ञमाली सुमालिनौ ३०
काश्यपाः सुमाली विप्रोऽभूद्भुक्त्वा लोकसुखं हरेः हरिभक्तिप्रसादेन विश्वनाथप्रभावतः ३१ स्मरन हरि
हरं भक्त्या मोक्षं प्राप्तः सुदुर्लभं ३२ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये यज्ञमाली सुमाली मोक्ष
वर्णनं नाम सप्तदशोऽध्यायः १७ सूत उवाच उपलेपनमाहात्म्यं कथितं वो मुनीश्वराः तस्मात्स
र्वप्रयत्नेन संपूज्यो जगतां पतिः १ एकामात्यपि ये विष्णोः सकृत्पूजां प्रकुर्वते न तेषां भवबंधस्तु
कदाचिदपि जायते २ ज्ञानेन मोक्षलाभः स्यात् प्रोचुरन्ये मुनीश्वराः ज्ञानं तु भक्तिमूलं स्याद्भक्तिः कृस्म०
सत्कर्मजा तथा ३ दानानि विविधा यज्ञास्तीर्थक्षेत्रादयः कृताः येन जन्मसहस्रेण तस्य भक्तिर्भवे २४

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

ध्दरौ ४ अश्रुद्धः परमो धर्म्मो भक्तिलेशेन जायते श्रद्धया परया चैव सर्व्वपापं प्रणश्यति ५ सर्व्वपापे
प्रनष्टे वै बुद्धिर्भवति निर्म्मला सैव बुद्धिः समाख्याता ज्ञानशब्देन सूरिभिः ६ ज्ञानं च मोक्षदं प्राहुस्तज्ज्ञानं
योगिनां भवेत् योगस्तु द्विविधः प्रोक्तः कर्म्मज्ञानप्रभेदतः ७ क्रियायोगं विना नॄणां ज्ञानयोगो न सिध्य
ति क्रियायोगस्ततस्तस्माछ्रद्धया हरिमर्च्चयेत् ८ अहिंसा सत्यमक्रोधो ब्रह्मचर्यापरिग्रहः अनी
र्ष्या च [redacted] दया चैव योगयोरुभयोः समा ९ चराचरात्मकं विश्वं विष्णुरेव न संशयः इति निश्चित्य म
नसा पूजयेद्धरिमव्ययं १० नारायणं जगद्योनिं सर्व्वान्तर्य्यामिनं हरिं इति निश्चित्य मनसा पूजयेत्तमन
न्यधीः ११ चराचरात्मकं लोकं नित्यं वा नित्यमेव च अनित्यमेव दृश्यादि नित्यमेको हरिः सदा १२ नित्या
नित्यपरित्यज्य नित्यमेव समाश्रयेत् इहामुत्र च भोगेषु विरक्तश्च तथा भवेत् १३ शमादिगुणसंपन्नो मुमु
क्षुर्ज्ञानमभ्यसेत् सनातनं परब्रह्म ज्ञानशब्देन कथ्यते १४ ज्ञानिनां परमात्मा वै हृदि भाति निरंतरं अ

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

०५८३५ ज्ञानं नाशयेद्योगी योगेन मुनिसत्तम १५ अंगैः संसिध्यति तु तं तं च वक्ष्यामि तत्वतः यमश्च नियमश्चैव
आसनानि च सत्तमाः १६ प्राणायामः प्रत्याहारो धारणा ध्यानमेव च समाधिश्च मुनिश्रेष्ठा योगांगा
५८ नि यथाक्रमं १७ एषां संयोगतो वक्ष्ये विधानं च मुनीश्वराः अहिंसा सत्यमस्तेयं ब्रह्मचर्यं अपरिग्रहः १८
अक्रोधश्चानसूया च प्रोक्ताः संक्षेपतो यमाः तपः स्वाध्याय संतोषाः शौचं च परिपूजनं १९ संध्योपास
न युक्ताश्च नियमाः परिकीर्तिताः यमश्च नियमश्चैव स्थिरबुद्धिर्जितेंद्रियः २० अभ्यसेदासनं सम्यक्
योगसाधनमुत्तमं पद्मकं स्वस्तिकं पीठं सौवर्णं चैव कुंजरं २१ कौर्म्यं वज्रासनं चैव वाराहं चार्धचंद्रकं
दंडं ताक्ष्यासनं चैव सर्वतोभद्रमेव च २२ मौनं वीरासनं चैव योगसाधनकारणं अभ्यासेन जयेत्
प्राणान्निःशब्दे जनवर्जिते २३ प्राणो वायुः शरीरस्थ आयामस्तत्परिग्रहः प्राणायाम इति प्रोक्तो ५८
द्विविधः कथ्यते हि सः २४ अगर्भश्च सगर्भश्च द्वितीयस्तत्परो वरः जपध्यानं विना गर्भः
सगर्भस्तत्समन्वितः २५ विषयेषु प्रसक्तानि इंद्रियाणि मुनीश्वराः समाहृत्य निगृह्णाति ०५५४५८
०५५३८

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

प्रत्याहारः स कथ्यते २६ अनिर्जितेंद्रियग्रामो यस्तु ध्यानपरो भवेत् मूढात्मानं च तं विद्यात् ध्यानं तस्य न सि
ध्यति २७ प्रत्याहृत्येंद्रियाणीह विषयेभ्यो यथाविधि चित्तं न चलते तस्मात् धारणा सा प्रकीर्त्तिता २८
सुषुप्तिवत् परानंदयुक्तश्चोपरतेंद्रियः निर्वातदीपवत् स्थः समाधिरभिधीयते २९ सर्वपापविनिर्मुक्तः
सदानंदैकविग्रहः योगी समाध्यवस्थायां न शृणोति न पश्यति ३० न जिघ्रति नैव स्पृशति न किंचिद्वक्ति
सत्तमाः अणोरणीयान्महतो महीयान् सनातनात्माखिलविश्वहेतुः पश्यंति तं ज्ञानवतां वरिष्ठाः
परात्परं समवाप्नुवंति ३१ आत्मानं परमं ध्यायेत् सर्वधातारमीश्वरं ध्यायेद्विश्वात्मकं विष्णुं
सर्वलोकैककारणं ३२ विकसत्पद्मपत्राक्षं चारुकुंडलशोभितं श्रीवत्सवक्षसं देवं सुरासुर
नमस्कृतं ३३ ध्यायेदात्मानमध्यक्षं परात्परतरं विभुं ध्यानं कृत्वा मुहूर्त्तं वै परं मोक्षमवाप्नुयात् ३४
इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये योगविधिर्नामाष्टदशोऽध्यायः १८ सूत उवाच धर्म्म

ते ४

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

वक्ष्यामि विप्रेंद्र मन्वाद्यैरुदितं च यत् युगधर्म्माः परिज्ञातव्याः स्मृतिमार्गाविरोधिताः १ अस्वर्ग्यं लोक
विद्विष्टं धर्म्मं नैवाचरेद्बुधः समुद्रयात्रास्वीकारः कमंडलुविधारणं २ द्विजानामसवर्णासु पुत्रसो
त्पादनं तथा देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्वधः ३ मांसादनं पितुः श्राद्धे वानप्रस्थाश्रमस्तथा
दत्ताक्षतायाः कन्यायाः पुनर्वैवाहिको विधिः ४ दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधको महाप्र
स्थानगमनं कलावेतन्नकारयेत् ५ दानं दद्याद्द्विजेंद्रेभ्यो यज्ञैर्द्देवान् यजेत्तथा कुर्याद्वेदस्य ग्रहणं
राजवैश्यप्रतिग्रहः ६ ज्ञातावधिगमः पत्न्याः शस्यते ब्राह्मणस्य तु दानं ददाति विप्रेभ्यः क्षत्रियोपि द्वि
जोत्तम ७ कुर्याच्च वेदग्रहणं यज्ञे देवान् यजेत्तथा शास्त्रं श्रुत्वा पुनश्चैव पालयेद्धर्म्मतो महीं ८
दुष्टानां शासनं कुर्य्यात् साधूनां परिपालनं पशुपाल्यं च वाणिज्यं कृषिश्च द्विजसत्तमाः ९ वेद
स्याध्यापनं यज्ञं वैश्यधर्म्माः प्रकीर्तिताः यजेद्दद्यात्पठेच्चैव सर्वलोकहितं तथा १० अनायासं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

महोत्साहं तितिक्षारनभिमानता । त्रिवर्गापरिचर्या च शूद्रधर्म इति स्मृतः ११ सर्वे च मुक्तिं पास्यं
तिस्ववर्णोचितकर्म्मिणः चत्वारश्चाश्रमैस्तेषां पंचमो नोपपद्यते १२ चतुर्भिराश्रमैरेभिः साध्यते
धर्म उत्तमोः पाखंडः स हि विज्ञेयः श्रुतिस्मृतिबहिःकृतः १३ गर्भाधानादिसंस्कारः कार्यो मंत्रवि
धानतः वेदग्रहणपर्यंतं निवसेद्गुरुसद्मनि १४ प्रातःस्नायी भवेद्दूरीं समित्कुशफलादिकं
गुर्वर्थमानयेन्नित्यं कल्यं कल्यं मुनीश्वराः १५ मधुस्त्रीमांसलवणं तांबूलं दंतधावनं उच्छिष्टभो
जनं चैव दिवास्वापं विवर्जयेत् १६ अनधीतस्य विप्रस्य सर्वं भवति निःफलं शब्दब्रह्ममयो विष्णुर्वेदः सा
क्षाद्धरिः स्मृतः १७ अनुज्ञातस्ततस्तेन कुर्यादग्निपरिग्रहं रूपलक्षणसंपन्नां सुगुणां सुकुलोद्भ
वां १९ असपिंडा च या मातुरसगोत्रा च या पितुः हीनक्रियं निःपुरुषं निंद्यं क्रोधसंकुलं २०
पादुकाछत्रगंधांश्च तथा माल्यानुलेपने जलकेलिं द्यूतवाद्यगीतं च परिवर्जयेत् २१ ३ श्री:

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

उन्मादिनमपस्मारघूतकुष्ठयुतंतथा स्त्रीसंबंधेदशैतानिपुरुषंतंविवर्ज्जयेत् २१ अनुलेपनलिप्तांगः
लेपितकेशानखः शुचिः उष्णीषंकंचुकंछत्रंपादुकेचउपानहौ २२ धारयेतपुरुषोनित्यंसुगंधंप्रिय
दर्शनः नित्यंस्वाध्यायशीलश्चसदाचारंचकारयेत् २३ परान्नेनैवभुंजीयातपरदारान्विवर्ज्जयेत्
पादेननक्रमेत्पादमुच्छिष्टंनैवलंघयेत् २४ नसंयुताभ्यांपाणिभ्यांकंडूयेदात्मनःशिरः पूज्य
देवालयंचैवनापसव्यंव्रजेद्द्विजाः २५ देवार्चनाशनस्नानव्रतश्राद्धक्रियादिषु नभवेन्मुक्तके
शश्चैनैकवस्त्रधरस्तथा २६ नवदेत्परपापानिस्वपुण्यंनैवकीर्त्तयेत् शवंदेवलकंयूपंचिति
काष्ठंचपुष्कसं २७ तथाश्रमिध्वजंस्पृष्ट्वासचैलंस्नानमाचरेत् शूर्पवातंप्रेतधूमंवृषलीपतिभ २७
भोजनं २८ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येवर्णाश्रमप्रसंगेएकोनविंशोऽध्यायः १९ सूतउवा कृष्ण०
च पुनर्द्धर्म्मान्प्रवक्ष्यामित्याश्रमाणांसमासतः लोकानांचहितार्थायपापराशिविनाशकान् १

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

त्वकृः सदा इंद्र उवाच अनया पितृभक्त्या ते जितोहं देवतैः सह ममापराधं त्वं सर्वं क्षंतुमर्हसि सत्तम १३
वरं वरय भद्रं ते दुर्लभं ते ददाम्यहं देवशर्म्मोवाच विप्र तेजो महद्रौद्रं दुःसहं देवमानुषैः १४ तेजो
भंगो न कर्त्तव्यो ब्राह्मणानां महात्मनां अमृतं देहि देवेंद्र पितृभक्तिं तथाऽचलां १५ एवमाभाष्य तं विप्र
ममृतं दत्तवान् स्वयं देवशर्म्मापि चागत्य पितरं वाक्यमब्रवीत् १६ अमृतेन त्वमद्यैव परां तृप्तिमवाप्नुहि
प्रियशर्म्मापि तच्छ्रुत्वा सर्वान् पुत्रानुवाच ह १७ वरं वृणुध्वं प्रीतोस्मि तावके [illegible] परैः पुत्रा ऊ
चुः यदि प्रसन्नो भगवन् वरं नो देहि सांप्रतं १८ अस्माकं जीवतां माता गता पापममंदिरे भवान्
पिता इयं माता जन्म जन्मांतरे पि वै १९ [illegible] पुत्रा भवाम इति देहिनः एवमुक्ते शुभे वाक्ये
तेषां माता समागता २० पत्युः पादौ प्रणम्याशु सुतान् प्राह प्रहर्षिता एतदर्थं हि विप्रो लोके वांछति तनया
न वरान् २१ विना पुत्रं पंकजं नारी संप्राप्नोति सुतोत्तमान् एवं मातुर्वचः श्रुत्वा पुत्रा वाक्यमथाब्रुवन् २२

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

पुत्रा ऊचुः सुपुरोपैः प्राप्यते मातः सन्माता सुपिता ध्रुवं श्रुत्वोवाच स पुत्रान् सां गछध्वं वैष्णवं पुरं २३ किंचि
त्कालं तु तिष्ठामि भूमौ वै भार्यया नया अनेनापि सुपुत्रेण पूजितः सोमशर्म्मणा २४ विष्णुरूपधराः स
र्वे चत्वारो भ्रातरः किल इंद्रनीलसवर्णांगाः पश्यतः शिवशर्म्मणः २५ गतास्ते वैष्णवं धाम पितृभक्त्या द्वि
जोत्तम २६ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये सोमशर्म्मेतिहासे द्वाविंशोऽध्यायः २२ सूत उवाच
प्रभावं तु प्रवक्ष्यामि सुतस्य सोमशर्म्मणः शिवशर्म्मा कदाचित्तु सुपुत्रं भक्तितत्परं १ सोमशर्म्माणमा
हूय इदं वचनमब्रवीत् शिवशर्म्मोवाच अमृतस्य महाकुंभो रक्षितव्यस्त्वयानघ २ तीर्थयात्रां प्रया
स्यामि अनया भार्यया सह सोमशर्म्मा ततो वाच करिष्यामि वचस्तव ३ सोपि कुंभं तस्य हस्ते दत्वा देशांतरं
गतः कुंभं रक्षति धर्म्मात्मा दिवारात्रावतंद्रितः ४ पुनः सोपि समायातः शिवशर्म्मा महायशाः मायां कृ
त्वा महाप्राज्ञो भार्यया सह तं सुतं ५ कुष्ठरोगातुरो भूत्वा तस्य भार्यापि तु तादृशी मांसपिंडोपमो जातो पि

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE
CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

ततोऽतस्य तौ द्विजाः ६ सुतः समागतौ दृष्ट्वा सर्वं तस्थापि दुःखितौ कृपया परया विष्टः सोमशर्म्मा महायशाः ७
तस्य पादौ नमस्कृत्य भक्त्यानमितकंधरः उवाच परमं वाक्यं कृतांजलिपुटः सरं ८ सोमशर्म्मा तु उवाच भवा
दृशं न पश्यामि तपसा हि समर्पितः गुणभावैः सुपुण्यैश्च किमिदं भाति मे त्वयि ९ पुत्रोऽहं तव विप्रर्षे
दासं मां विद्धि सर्वदा तवांगे केन पापेन गदोऽयं वेदनान्वितः १० संजातः कृतिनां श्रेष्ठ तन्मे कथय कारणं
इयं पुण्यवती माता महापुण्या पतिव्रता ११ या हि भर्त्तुः प्रसादेन त्रैलोक्यं त्रातुमर्हति सा कथं दुःखमाप्नोति
किं नास्ति तपसः फलं १२ शिवशर्म्मा उवाच मा शुचत्वं महाभाग भुज्यते कर्म्मजं फलं नरेण कर्म्मयुक्तेन
पापपुण्यानुसारतः १३ शुश्रूषणां महाभाग उभयो रोगयुक्तयोः यथाशक्ति कुरुष्व त्वं यदि पुण्यमिहेच्छसि १४
एवमुक्ते शुभे वाक्ये सोमशर्म्मा महायशाः शुश्रूषां वा करिष्यामि यत्नतः पुण्यमुक्तयोः १५ मया पापेन दु
ष्टेन कृपणेन द्विजोत्तम किं कर्त्तव्यमिहास्त्यद्य भुज्यते न हि चेद्ध्रुवं १६ एवमाभाष्य दुःखात्मा तयोर्दुःखेन दुः
खितः यत्नतः सेवनं चक्रे अंगसंवाहनादिभिः १७ तीर्थेन पतितं धर्मात्मा स्कंधमारोप्य नित्यशः

मुक्तेसे

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

माहात्म्य०
मार्गशीर्ष
३३

णवैतौ मंत्रविधिना सःस्नापयतिनिर्म्मितं १८ पितॄन्संतर्प्य विधिवद्देवान्भक्त्याप्यपूजयत् स्वपंहोमं
करोत्यग्नौ पंचयज्ञमनुत्तमं १९ संभोजयतिसुप्रीत्या णवैतौ पितरौ तदा श्राव्यासेने भुंतौ विप्रं तस्याप
यतिपत्नितः २० वस्त्रपुष्पादिकं सर्वं ताभ्यां नित्यं प्रयच्छति अनेन क्रमयोगेन नित्यमेवप्रसादयत् २१
तथापि सोमशर्म्माणं पिता क्रुध्यति निष्ठुरं कृते कार्ये विपत्नेन निंदत्येनं पुनः पुनः २२ न कृतं शो
भनं पुत्र त्वयैवकुलपांसन एवं नानाविधैर्वाक्यैस्ताडयन्मुखिभिः सदा २३ मनसा वचसा पुत्रः कर्म्मणा
पितरौ यजत् अमृतं रक्षते पत्नात्तदानीं देवशर्म्मणः २४ पित्रोराराधनं चक्रे त्यधिकं सोत्सुकः सुतः
शिवशर्म्मा पितं दृष्ट्वा मनसेदमचिंतयत् २५ पुनर्म्मायां चकारासौ कुंभादपहृता सुधा पश्चात्पुत्रं ३३
समाहूय सोमशर्म्माणमब्रवीत् २६ रक्षितं यत्त्वया दत्तममृतं व्याधिनाशनं तन्मे शीघ्रं प्रयच्छस्व कृष्ण०
स्वपं पानं करोम्यहं २७ येनत्यौ तरामवाप्य प्रसादाद्देवशर्म्मणः तेनारिक्तं घटं दृष्ट्वा विस्मुभक्ताप

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

अस्त्वच्छास्त्वाभिज्ञवर्णास्वादनंनखेकेशपाशोः तथैवनस्नस्थानेसर्वथापरिवर्जयेत २ शिरोभ्यंगावशि
ष्टेनैवतैलेनांगंनलेपयेत तांबूलमशुचिर्न्नाघ्रातथासुप्तंनबोधयेत ३ नचक्रमेत्कुरोः छायांतदाशा
नैवलंघयेत अयनेविषुवेचैव ४।१०।१।७ मन्वादिषुयुगादिषु ४ दर्शेचापरपक्षेचश्राद्धंकुर्या
द्गृहीसदा देनवाज्ञेसपाहेचअष्टकान्वष्टकासुच ५ श्रोत्रियेगृहमायातेग्रहणेचंद्रसूर्ययोः
पुण्यपक्षेत्रेषुसर्वेषुगृहीश्राद्धंसमाचरेत ६ दंतधावनतांबूलेस्निग्धस्नानमभोजनं रत्यौषधि
सप्तः परान्नानिश्राद्धकृत्वर्जयेत ७ पुनर्भोजनमध्वानंभारमध्वानमैथुनं दानंप्रतिग्रहोहोमः
कृ चा२पु श्राद्धभुक्ष्टवर्जयेत ८ स्वाध्यायेनर्षीनपूज्यहोमैर्देवान्यथाविधि पितृन्श्राद्धेनतृप्येत
भूतानिबलिकर्मणा ९ गुरुःपिताचमाताचेत्रयएवत्रयोग्नयः अनादृतास्तुयेनैतेसर्वास्तस्या
२.४ (फलाःक्रियाः १० यावत्त्रयस्तेजीवेयुस्तावन्नान्यंसमाचरेत एषधर्मःपरःसाक्षादुपधर्मो

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

माहात्म्य०
मार्गशीर्ष० २ न्य उच्यते ११ यन्मातापितरौ लोके शंसहेते संभवे नृणां न तस्य निःकृतिः शक्या कर्तुं वर्षशतैरपि १२ तयोर्नि
त्यं प्रियं कुर्वन् त्रिलोकीं हि जयेद्गृही पित्रोर्भक्त्या सोमशर्म्मा तया न्ये तस्माज्ज्येष्ठा मातरश्चैव मुक्तिं प्राप्तुं श्लो
२८ लोभवं धाप्यविस्मोत्तस्मात्तु ज्येष्ठौ सदाभ्यर्चनीयौ १४ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये वर्णाश्रमनि
रूपणं नाम विंशोऽध्यायः २० शौनक उवाच सोमशर्म्मा भवत्कोवा कथं मुक्तिमवाप्तह एतद्ब्रूहि महाभा
ग श्रोतुमिच्छामि तत्वतः १ सूत उवाच पश्चिमे सागरस्यांते द्वारकायां द्विजोत्तमाः शिवशर्म्मेति विख्या
तो बभूव द्विजसत्तमः २ तस्यापि पंच पुत्राश्च बभूवुः शास्त्रकोविदाः यज्ञशर्म्मा वेदशर्म्मा धर्म्मशर्म्मेति वै
व च ३ देवशर्म्मा महाभाग सोमशर्म्मा तु पंचमः एते पंचापि विद्वांसः पितृधर्म्मपरायणाः ४ पित्रोर्भक्तिं
विना नैव धर्म्मं जानंति चापरं तेषां तु भक्तिं संदृष्ट्वा शिवशर्म्मा तपोधनः ५ चिंतयामास मेधावी निष्क २८
र्षं ब्येसुतोत्तमान् पितृभक्तेषु यज्ञाद्यमेतेषां मनसीप्सितं ६ यथा जानाम्यहं चाघ कारिष्ये वुद्धिपूं कृ.स्क०

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

पूर्वकं विचार्य्यैव विचकारास्तावुपायं योगवित्सुधीः ७ तेषामग्रे ततो विप्रः शिवशर्म्मा विदर्शयत महता
ज्वररोगेन मृता माता विदर्शिता ८ ते सुदृष्ट्वा मृतां मातां पितरं वाक्यमब्रुवन् यथा वयं समुत्पन्नाः पालि
तास्त्वयैव ततः ९ अपहाय गता सा च सर्वांस्तात किमुच्यते इत्युक्तः शिवशर्म्मा यज्ञशर्म्माणमब्रुवी
त् १० शिवशर्म्मा उवाच अनेनायसुतीक्ष्णेन खड्गेन निशितेन वै निकृत्यांगानि सर्वाणि यत्र तत्र
क्षिपस्व हि ११ ततः कृतं तेन पुत्रेण यथोद्दिष्टं शासनं पितुः समागत्य पुनः पश्चात् पितरं वाक्यमब्रुवीत् १२
यथादिष्टं त्वया तात तत्सर्वं कृतवानहं अन्यत् किंचिद्विधेयं यत्तत्सर्वं कथयस्व मे १३ एवं तं च पितुर्भ
क्तं ज्ञात्वोवाचापरं सुतं शिवशर्म्मा उवाच वेदशर्म्मन् महाभाग कुरुष्व मम शासनं १४ स्त्रियं विना न
शक्नोमि स्थातुं कंदर्प्पमोहितः एवमुक्त्वा सुतं विप्रो निकटे दर्शयत् स्त्रियं १५ मायया निर्मितां युक्तां
सर्वसौभाग्यसंयुतां उवाच वेदशर्म्माणं मिमामानय मत्कृते १६ सोप्युवाच महाभाग चरिष्ये तव शासनं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

 १७ वृत्तेमे

 पितरं च नमस्कृत्य गत्वोवाच तदंतिके त्वामेवेच्छति मे तातः कामबाणप्रपीडितः स्वल्पं तं जरयायुक्तः

प्रसादसुमुखी भव १८ भज त्वं चारुसर्वांगि पितरं मम सुंदरि एवमाकारितं तस्य श्रुत्वोवाचाथ तं

 द्विजं १९ स्त्री उवाच जरयापीडितं विप्रं न वृत्तोमि कदाचन सश्लेष्मलपनं दीनं व्याधिग्रस्तं च

लोलुपं २० भर्तारं तु मिच्छामि समर्थं विषयं गृहे किं करिष्यसि तातेन वृद्धेन शृणु मानद २१

ममांगभोगभावेन सर्वं प्राप्स्यसि दुर्लभं वेदशर्म्मा उ० धर्म्मयुक्तं न ते वाक्यं मयुक्तं पापसंयुतं २२

पादशंभाषसे देवि पितृभक्तेत्यनागसि पितुरर्थे समायातस्तस्मात्त्वां प्रार्थये शुभे २३ स्वन्यदैं

वं न वक्तव्यं भज त्वं पितरं मम यद्यदिच्छसि देवि त्वं त्रैलोक्ये सचराचरे २४ तद्दास्यामि न संदेहो २९

देवि नाख्याधिकं शुभे स्त्री उवाच० एवं समर्पीतं मे पितुरर्थे सदा भवान् २५ तदा मे दर्शयाद्येव

संद्रान्देवानिहानघ किं ते बलं महाभाग दर्शय स्वस्य मात्मनः २६ वेदशर्म्मा उवाच पश्य

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

यश्चपवलंमत्यंप्रभावंतपसोवलं समाहृतानस्माघातानतानिंद्राघानसुरोत्तमान २७ इत्युक्त्वाचा
क्पेदेवानतेचापातास्तुवेतदा वेदशर्म्मीणामूचुष्म किंकुर्म्मस्त्रद्दिजोत्तम २८ एवंवंचेच्छसेविप्रतंदत्त
मोनसंशयः वेदशर्म्मोउ॰ यदिदेवाःप्रसन्नामेप्रसादस्सुमुखायदि २९ तदास्तुविपुलाभक्तिःपाद
योःपितुरेवमे एवमस्त्विति तेसर्वेतमुक्त्वाख्याग्रमानयपुः ३० तमुवाचततोहृष्टोदक्षंतेतपसोवलं देव
तैस्तुनमेकार्य्यंयदिचेद्दातुमिच्छसि ३१ देहित्वंस्वशिरोविप्रस्वहस्तेननिकृत्यमे देवशर्म्मोउवाच धन्यो
हमद्यसंजातोमुक्तोद्यैवऋणात्रयात् ३२ स्वशिरस्तेप्रदास्यामिगृह्यतांगृह्यतांशुभे सूतउवाच इत्युक्त्वाती ५८
क्ष्णधारेणशस्त्रेणद्विजसत्तमः ३३ निकृत्यस्वशिरस्तस्यैदत्तेतेनप्रहस्यच रुधिरेणाप्लुतंसाचप
रिगृह्यगतामुनिं ३४ त्वदर्थेप्रेषितेविप्रपुत्रेणावेदशर्म्मणा उत्तमांगंप्रदत्तंमेपितृभक्तेनतेनवै ३५ त्व
दर्थेप्रेषिताहंचपरिभुंक्ष्वसुखेनमां तस्यैतेभ्रातृभिर्दृष्टं पित्रर्थेचकृतंशुभं ३६ शिवशर्म्माशिरोदृष्ट्वाहृष्टं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

माहात्म्य०
मार्गशीर्ष० ष्टितं वेदशर्म्मिणा धर्म्मशर्म्मी तमाहेदं शिर एतत्प्रगृह्यतां ३७ धर्म्मशर्म्मा तदादाय निर्जगाम त्वरान्वितः पितृ
भक्त्या तपोभिश्च सत्याज्जितैः तपोबलात् ३८ धर्म्ममाहूतुमिच्छद्वै धर्म्मशर्म्मा तदा समाकृष्टस्तु धर्मो वै
३० तपसा तस्य धीमता ३९ धर्म्मस्तत्र समायातः इदं वचनमब्रवीत् धर्म्म उवाच कस्मात्त्वयाऽऽसमाहूतस्त
न्मे कथय सुव्रत ४० यत्कथ्यते यत्तत्सर्वं करोम्येव न संशयः धर्म्मशर्म्मो उवाच यद्यस्ति गुरुशुश्रू
षायाः दिनिष्ठाबलं तपः ४१ तत्सत्येन मया धर्म्म वेदशर्म्मा स जीवतु एवमुक्ते ततो वाक्ये वेदशर्म्मा तथो
त्थितः ४२ प्रसुप्त इव तं चाह क्व गता मम मातृका उपकारं करोमि ते त्वं नान्यस्त्वत्समो भुवि ४४ इत्युक्तौ
भ्रातरौ तत्र गतौ च जनकान्तिकं धर्म्मशर्म्मा तदोवाच पितरं दीप्ततेजसं ४५ मयायं वै महाभाग शिरसा
जीवितेन च शिवशर्म्मा ततो हृष्टो भक्तिं विज्ञाय तस्य च ४६ ॥ न किंचिदब्रवीत्तं तु प्रोवाचान्यसुतं प्र ३०
ति देवशर्म्मिन् महाभाग वत्स मे वचनं कुरु ४७ इंद्रलोकं व्रज स्वाशु पाद्यामृतमानय तां प्रति श्वनया सा तास्म०

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

कांतपासार्द्धंपातुमिछामिसुव्रत ४८ नाशंपातुजरामेघमवामितहरणोत्यहं वृधंज्ञात्वासतकरोतिनमां
बालासुरूपिणी ४९ ग्मुनपाप्रियपासार्द्धं निर्द्दोषोविहराम्यहं तथाकुरुष्वमेभद्र मद्भक्तोसिसदा
भवान ५० एवमाभाषितस्तेनदेवशर्म्मामहामतिः पितरंतंनमस्कृत्यगमनायोपचक्रमे ५१ अंतरिक्षे
गतश्चासीत्तपसानियमेनच सदृष्टोदेवराजेनसहस्राक्षेणधीमता ५२ ज्ञात्वातस्यात्तमांशक्तिं विघ्ना
र्थंसमुपादिशत मेनकांतामुवाचेदंगछत्वंममशासनात ५३ तथाकुरुष्वविप्रोसौनायातिममसंदिरं ५४
एवंसमाकर्ण्यसुरेंद्रभाषितंजगामसम्मोहयितुंद्विजोत्तमं सामेनकासर्वसुरांगनोत्तमाशृंगारसत्का
रवतीसुरूपा ५५ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येसोमशर्म्मेतिहासेएकविंशोध्यायः २
सूतउवाच अथरूपगुणोपेतामेनकाप्सरसांवरा सुस्वरेणाचगायंती गीतंवीरणस्वरोत्तमा १ नंद
नस्यवनस्यांतेदोलायांसमुपस्थिता तेनदृष्टाविशालाक्षीमेनकास्वर्गभूषणा २ इंद्रेणप्रेषिता

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

ज्ञात्वासा जगामातिसुंदरं सापृोवाच महात्मानं कथमास्यसि महामुने ३ देवशर्म्मा ततोवाच मेनकाम
प्सरोवरां इंद्रलोकं प्रयास्यामि पितुरैर्वलरान्वितः ४ मेनकाप्रत्युवाचेदं देवशर्म्माणमुत्तमं काम
वार्त्ताःप्रभिन्नाहंत्वामेवशरणंगता ५ रक्षस्वद्विजशार्दूलयादिधर्म्मांस्त्वमिच्छसि देवशर्म्मा ततो
वाचमेनकांकामपीडितां ६ भवत्याश्च प्रजानामि नाहंवैनाहंदाः शुभे भवत्यारूपलावण्येपरन्ने
मुत्स्यतिशोभने ७ विश्वामित्रादपोदेविपुत्रोहंशृणुशाम्भितः मेनकामादपोदेषा जितंयोग
बलेनवै ८ अन्यंभजविशालाक्षिगच्छामित्रिदशालयं सूतउवाच एवमुक्त्वाजगामाथत्वरि
तोद्विजसत्तमः ९ अथकुपितामहातेजा नंदनंवनमाश्रितः इंद्रप्रतिमहाभागमुवाचपरुषंवचः १०
देवशर्म्माउवाच निजधर्म्मरतस्यापयोविघ्नंतु समाचरेत् तस्यदंडंप्रदास्यामियोवैहन्यात् ३१
सहन्यते ११ इंद्रलोकादहंत्वांवैपातयिष्यामिनान्यथा अन्यामिंद्रकरिष्यामिधर्म्मात्तांपा हेम०

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

साधव २८ उवाच परमं वाक्यममृतस्यापि लब्धये यदि मे सत्यमस्तीह गुरुशुश्रूषणोद्भवं २९ त्वरस्त
दा सुधापूर्णो भवत्येव न संशयः यावद्देव महाभाग श्चितापिता ह्यलोकयत ३० तावद्देव सुधापूर्णः पुन
रेवाभवद्घटः गत्वा गुरुं नमस्कृत्य कुंभमादाय सत्वरं ३१ गृहस्तो मे पितः कुंभममृतस्य समागतं यानं
कुरु महाभाग गर्दान्मुक्तो भवस्व हि ३२ शिवशर्म्मा उवाच तुष्टोहं पुत्र ते भक्त्या यथेष्टं काममाप्नुहि दि
व्यदेह वपुर्भूत्वा सपत्नी ससुतस्तदा ३३ वैकुंठमगमन्नूनं सर्वलोकस्य पश्यतः अतो द्विजास्तपो
भक्त्या समं किंचिन्न विद्यते ३४ पित्रोर्भक्ति विशेषेण कुर्वन्या गृहमेधिभिः गार्हस्थ्या॰द परो नास्ति
श्रेष्ठः कोप्याश्रमो त्र हि ३५ पंचसूनागृहस्थस्य चुल्ली पेषण्युपस्करी कंडन्युदककुंभी च बाध्यते
च गृहे स्थितं ३६ पंचसूनागृहस्थस्य प्रवर्त्तते दिने दिने अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं ३७
देवार्च्चनं च होमश्च अतिथीनां च पूजनं पंचैतान् यो महायज्ञान् प्रकरोति स्वशक्तितः ३८ स गृहेपि व

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

प्रजायते? भर्त्री ४

सन्नित्यं सूनादोषैर्न्निभिद्यते यत्र नार्य्यः प्रपूज्यंते तेन धर्म्मस्तत्र फलान्वितः ३९ यत्रैतास्तु न पूज्यंते स
र्वास्तत्राफलाः क्रियाः शोचंति नार्य्यो वै यत्र विनश्यत्याशु तत्कुलं ४० वृद्धा बालाश्च पूज्यंते तत्र
धर्म्मः सनातनः तस्मादेतान्समभ्यर्च्य भूषणाच्छादनादिभिः ४१ संतुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या
तथैव च यस्मिन्गृहे हि तस्मिन्नैवं शाश्वतसंपद्विभाव्यते ४२ पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरसमा
त्मनः एतेषां कलहेन स्त्री गर्ह्यं कुर्यात्कुलद्वयं ४३ सदा प्रहृष्टया भाव्यं गृहकार्य्येषु दक्षया सुसं
स्कृतोपस्करया व्यये चामुक्तहस्तया ४४ विशीलः कामवृत्तो वा रोगी क्रोधी दरिद्रवत् मूर्खो जडो जरा
ग्रस्तो गुणैर्वापि परिवर्जितः ४५ उपचर्य्यः स्त्रिया साध्व्या सततं देववत्पतिः ४६ पतिं विना नैव हास्ति
दैवतं स्त्रियः सुरेश्वर पिचेत स संयुतः अथेतिहासं कथयाम्यनुत्तमं यच्छृण्वतां नश्यति पापसंचयः ३४
यः ४७ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये सोमशर्म्मेतिहासनिरूपणं नाम त्रयोविंशोऽध्यायः २३ स्कं०

विंशोऽ २१

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

सूतउवाच अस्तिवाराणसीनामागंगातीरेमहामुनिः तस्यांवसतिवैश्यश्चकृकलोनामनामतः १ त
स्यभार्यामहासाध्वीसुकुलाचारमंगला तीर्थयात्राप्रसंगेनकृकलोधर्मतत्परः २ प्रस्थितोधर्मवृ
ध्यर्थंतमुवाचपतिव्रता सुकुलाउवाच अहंतेधर्मतःपत्नीनैवत्याज्याकथंचन ३ पतिमार्गव्रतीना
हंपतिदेवंभजाम्यहं सर्वतीर्थमयोभर्त्तासर्वदेवमयःपतिः ४ नास्तिस्त्रीणांपृथकधर्मःपतिशुश्रूष
णंविना तवपादौसमाश्रित्यआगमिष्यामिनान्यथा ५ कृकलउवाच ममप्राणप्रियासित्वंनित्यंधर्मस
चाश्रयः गृहेतिष्ठसुखंतीव्रावेदनात्यध्वजाप्रिये ६ सूतउवाच एवमाभाष्यतांभार्यांसंबोध्यचपुनःपु
नः तथाप्यज्ञातमात्रासौसार्थेनसहसंगतः ७ तस्मिनगतेपतौसाचसुकुलाविकलाभवत ऊचुश्च
सुकुलांसर्वाःसख्यस्तद्दुःखदुःखिताः ८ सख्यऊचुः तीर्थयात्रांगतोभर्त्तापुनरेष्यत्यसंशयं वृथा
शोचंपसेदेहंवृथाशोकंकरोषिवै ९ कस्यभर्त्तासुताःकस्यकस्यस्वजनवांधवाः भोक्ष्यतेभुज्यतेय

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

सुभ्रवाया ३

माहात्म्य० त्वसंसारस्यैव तत्फलं १० सुकुला उवाच भवतीभिर्यदुक्तं वै सर्वं तद्वेदसंमतं तु वै भर्त्तारि संसारे नारी स्या

मार्गशीर्ष० त्सुखभागिनी ११ पतिहीना यदा नारी भवेद्धा भूमिमंडले कुतस्तस्याः सुखं रूपं यशः कीर्त्तिः श्रु

३५ मं धनं १२ इत्यपेयं नृपते सत्यमितिहासः पुरातनः सुदेवायाश्च चरितं तत्सुपुण्यं पापनाशनं १३ इ

क्ष्वाकुनामयोध्यायां राजा परमधार्म्मिकः तस्य भार्या महापुण्या सुभ्रवा सत्यतत्परा १४ तया

सार्द्धं वने राजा ययौ सैन्यसमन्वितः क्रीडमानस्य राज्ञस्तु वराहश्च समागतः १५ बहुसूकरयूथेन

त्रैः समन्वितः पुत्रपौत्रैरलंकृतः एका च सूकरी तस्य प्रिया पार्श्वे समागता १६ दृष्ट्वा वराहाधिपतिर्मृगानां कदनं

महत् तानुवाच सुतान्भार्यां कोशलाधिपतिर्बली १७ क्रीडते मृगयां कांते मृगान्संहरते बहून्

समंताद्दृष्ट्वा महाराजो एष्यते नात्र संशयः १८ अन्येषां लुब्धकानां च नास्ति मे हृदये भयं प्रिये ३५

प्रिये करिष्ये नाशं वै मम चैषा महीपतिः १९ पातकं क्षालयिष्यामि पुष्टेन धर्म्मशालिना पु कृ०मा०

ष्यते नाशं मम ९

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

ज्ञानयोज्ञानगृहीत्वात्वंपर्वतंगछसत्वरं २० ममस्नेहंपरित्यज्यनृपएषःसमागतः शूकरश्चोवाच यस्मिनपथे
भवान्स्वामिन्पुत्रपौत्रैरलंकृतः २१ तदेवालंकृतंपूर्णंभवतापरिशोभते त्वांविनेदंमहाभागकी
दृग्रूपंभविष्यति तवैवचबलेनापिगर्जमानाश्चशूकराः नेकुर्वंतिभयंतीव्रंसिंहानांव्याघ्रदंतिनां २२
यस्याश्चसिंहयोर्मध्येवराहःपिबतेजलं द्वयोःशूकरयोर्मध्येसिंहोनैवपिबेज्जलं २३ अन्योन्य
मेवसंभाष्ययपोप्रधानशूकरः राजापिदृष्टातत्सर्वंसैन्यंकोलैर्निपातितं २४ क्रुद्धएववज
गामाशुतंहंतुंवरशूकरं ध्रौंसममवपुर्धमन्यान्यजयकांक्षिणः २६ गृहीत्वानिशितंखड्गंप्रा
हरत्तंकटिदेशके सोपिराज्ञोहयंहत्वामूर्छितःस[illegible]नपपातह २७ देवैश्चवृष्टःकुसुमैश्चचं
दनैश्चचतुर्भुजः सोपिबभूवशीघ्रं दिव्येनयानेनगतोदिवंतदासुपूज्यमानंसुरराजकोलैः २८
गंधर्वराजःसबभूवभूपोलोकंस्वकंकायमिहप्रपद्य २९ इतिश्रीस्कंदपुराणेइक्ष्वाकुजन्मपु

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

पेतिहासेचतुर्विंशोऽध्यायः २४ सुकुलाउवाच श्रूयतेलुब्धकाःसर्वेशूकरींप्रतिजग्मिरे चतुःपुत्रयुतासापि
कथयामासतान्सुतान् १ यावत्तिष्ठाम्यहंवत्सास्तावद्गच्छतुशीघ्रतः तेषांमध्येसुतोज्येष्ठः कथयामाससमा
तरं २ पुत्रउवाच त्यक्त्वात्वांजीवलोभेनकथंयास्यामिमूढवत् पितृवैरंगृहीष्यामिसोधर्मिष्ठरतोरिवं ३
नीत्वाकनीयसःपुत्रान्प्रयाहिगिरिकंदरं मातरंपितरंत्यक्त्वायःप्रयातिसमूढधीः ४ नरकंसःप्रयाति
वह्मिकोटिसमाकुलं सुकुलाउवाच तयोरेवंकथयतोरायातास्तेपिलुब्धकाः ५ प्रहृन्युक्तोमरैस्ती
श्वौघैश्चकैश्चमुशलैस्तथा पृष्ठतोमातरंभ्रातॄन्कृत्वासंयुयुधेसतैः ६ दंष्ट्रयानिहताःकेचित्केचित्तु
डेनपातिताः चकारकदनंसंख्येदृष्टोराज्ञामहात्मना ७ स्मरन्राजापितुस्तस्यविक्रमंतंजघानह
ग्वपृष्ठंचतुंडेनवाणेनममारचसशूकरं ८ शूकरीपुत्रशोकार्त्ताजघानपरितोभटान् तयाचनिहताःशूरा
स्तुंडघातैर्महीतले ९ ययाकृत्वासमुद्भूताविचचारभयप्रदा तदोवाचनृपंराज्ञीमहत्सैन्यंनिपाति

त्वा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

ते १० कस्मादुपेक्षसेराजन तन्मेत्वंकारणंवद तामुवाचततोराजानाहंहन्मिइमांस्त्रियं ११ महानदोषःस्त्रिये
दृष्टःस्त्रीवधेमुनिपुंगवैः एवंकथयतोराज्ञःसाचार्यात्त स्वसम्मुखं १२ ततोनिवर्त्तयनराजाजघानैकेन
पत्रिणा सासंलग्नेनवाणेन मूर्छ्यातिपरिप्लुता १३ श्वासमानापपातोर्व्यांविचेष्टंतीतथाभूतां शूकरींजी
वमानांतांदृष्ट्वाराज्ञीकृपावती १४ अभ्यषिंचच्छीतलेनवारिणापापपज्जले साभिषिक्तासमाश्वास्यवाचं
प्रोवाचमानुषीं १५ भद्रंभवतुतेदेवियतःसिक्तात्वयाद्यहं संपकीदृशीनात्तयागतामेपापसंचयः १६ राज्ञी
श्रुत्वायथावाणीमुवाचशूकरींतदा कात्वंशूकरिपूर्वंवैकोयंतेपतिरीदृशः १७ शूकरीउवाच रंगविद्याध
रोनाम्नापतिर्मेपूर्वजन्मनि मेरुपृष्ठेपुलस्त्योवैचचारविपुलंतपः १८ रंगविद्याधरस्तत्रगतःसस्वेच्छया
शुभे वृक्षछायांसमाश्रित्यतदागीतंसमभ्यसत् १९ ततःश्रुत्वामुनिस्तस्यध्यानाच्चलितमानसः गायंतंत
मुवाचेदंगीतविद्याधरंद्रुतं २० मनोमेचलितोध्यानाद्गीतेनानेनमानद इमंस्थानंपरित्यज्यअन्यस्थानं
व्रजस्वभो २१ गीतविद्याधरउवाच आत्मज्ञानिश्शुभांविद्यामहंचैवप्रसाधये नान्यायोरत्त्वमहाभा

आत्मनाहिशुभां।१

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

गमदीपस्त्वयिदृश्यते २२ पुलस्त्यउवाच सत्यमुक्तं त्वयात्वत्र शृणुवाक्यं महामते नाहं गीतं प्रकुर्वामि चप
लं मम मानसं २३ चाल्यते मानसं त्वत्र ध्याने भवति नस्थिरं यत्र शक्तो न रूपं च पुरतिर्नैवतिष्ठति २४
पुनयस्तत्र तिष्ठति तपःसिध्यर्थहेतवे गीतविद्याधरश्रेष्ठ बलमिंद्रियवर्गस्यजितंयेन महात्मना २५ तप
स्वीकथ्यते योगी सचधीरः ससाधकः भवंतस्तु जहीनः किं मम गीते न दूषणं २६ अत्र च साधारणो वास्मा
कं वासस्ते चापि भो द्विज सुखेन पूर्वं गच्छ त्वं कुर्वंतु स्वेच्छया शुभे २७ एवं तज्ञापितं श्रुत्वा गतः स्थानांतरं
मुनिः गते मुनौ ततः काले प्रेरितः सोप्यचिंतयत् २८ कागतस्तिष्ठते कुत्र कथं पश्यामि तं मुनिं अन्वेष
यन् गतस्तस्य चाश्रमं शूकरोऽभवत् २९ दृष्ट्वा मुनिं चकारास्य संक्षोभं बहुधा हि सः एकदा स्वेन रूपेण ३७
हासं कृत्वा त्वगायत ३० श्रुत्वा चुकोप स मुनिस्तं शशाप महातपाः यस्मात्शूकररूपेण मामेवं दुः हस्त०
खदो भवान् ३१ तस्मात्त्वं भुजपापी वै पापयोनिं च शूकरीं इक्ष्वाकुर्नाम धर्मात्मा सते मृत्युर्भविष्यति ३२

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

तदात्मरूपंलक्ष्योऽसितदघवर्द्धितंशुभे एतत्तेसर्वमाख्यातंममापिशृणुशोभने ३३ कलिंगाख्येशुभेदेशेश्रीपु
रंनामपत्तनं तत्रावसन्महातेजावसुदत्तोद्विजोत्तमः ३४ धनपुत्रादिभिःपूर्णस्तस्याहंपुत्रिकाशुभे अभवं
रूपसंपन्नाभूषणौघैश्चभूषिता ३५ पितादद्यौशुभेलग्नेद्विजायशिवशर्म्मणे पित्रादत्तास्मितस्यैवपितुर्गे
हेस्थितात्वहं ३६ पुंश्चलीनांप्रसंगेनसद्भावोविगतोमम स्नेहाच्चसुरवर्गस्यपक्षमतेममदुःकृते ३७ गतोऽ
क्षौ॰ प न्यदेशंदुःखेनमांत्यक्त्वातत्रशोभने त्यक्त्वाहंवंधुभिःसर्वैःदेशाद्देशांतरंभ्रमती ३८ नकुत्रचित्सुखंप्राप्तंसंवा
सोवामयाशुभे सुसमृद्धामयादृष्टापुरीब्रह्मावतीशुभा ३९ तत्रखर्परकंहस्तेगृहीत्वाक्षुधयातुरा गृहाणां
द्वारदेशेषुयाचमानामुहुर्मुहुः ४० शिवशर्म्मापिशुश्राववचनंममंदिरे मंगलाख्यापराभार्य्यातेनैवचविवा
हिता ४१ तामाहूयसचोवाचभिक्षुकीयंसमागता एनांभोजयभद्रे त्वंशुभेनान्नेनश्रद्धया ४२ प्रियो
क्तंमंगलाश्रुत्वाश्रद्धयामामभोजयत मामुवाचसधर्म्मात्माकासित्वंभ्रमसेकथं ४३ केनकार्य्येणसर्व
त्रकथयत्वंसमागतः एवमाकर्ण्यतद्वाक्यंत्वरेसालक्षितामया ४४ व्रीडयाऽधोमुखीजाताज्ञात्वातेनसा

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

मिनं मुने एतद्दृष्ट्वा मंगला च भर्तारमिदमब्रवीत् ५५ का चेयं हि स्वमाचक्ष्व त्वां दृष्ट्वेयं विलज्जते ५६ इति श्रीस्कं
दपुराणे मार्गशीर्षमाहात्म्ये सुकुलोक्तेतिहासे पंचविंशोऽध्यायः २५ शिवशर्मोवाच देशाद्देशांतरात्प्राप्ता
वराकी भिक्षुकी त्वियं जायामे कारणं प्राप्य त्वत्केनामहमागतः १ ममदुःखेन दग्धेयं वियोगेन वरानने
मां ज्ञात्वा मत्कृहं प्राप्ता भिक्षुकीरूपधारिणी २ एवं ज्ञात्वा प्रियेचास्यै त्वातिथ्यं प्रतिपादितं सूकरी उवाच
भर्तुर्वाक्यं निशम्याथ मंगला पतिदेवता ३ हर्षेण महता विष्टा स्वयमेव तु मंगला स्नानादिभिर्भूषणैर्मं
चक्रे शुश्रूषणं बहु ४ भर्तुर्मानं मया दृष्ट्वा त्वात्मनस्तु सुदुःखकृत् भर्त्राहं मानिता मद्य मया भर्त्तानमा
नितः ५ शुश्रूषणं च न कृतं सद्वाक्यं नैव भाषितं कथं संभाषणं चापि करिष्ये पापनिश्चया ६ तथैवैवं वि
तप्ता नाथ पतिता दुःखसागरे चिंताव्याकुलचित्ताया हृदयं स्फुटितं मम ७ यमदूतैः सुबध्वाहं दुर्गमार्गेण
पीडिता नरकेषु च संक्षिप्ता सर्वेषु च यमाज्ञया ८ ततः कुत्सितयोनिं च गताहं पापसंचयैः कोष्ठिकी योनिमा

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

पतिताऽदुःखसागरे १० राजोवाच किं हतं तेहि महाभद्रे ।
सा यया वानयोनिं पुनर्गता ९ एवं योनिसहस्राणि गतेदानीं च शूकरी मामुद्धर महाभागे दुःखान्तं पुराणसं
भवं येनाहमुद्धरे त्वां चैतन्मे त्वं वद निश्चितं ११ शूकर्युवाच अयं राजा महाबाहुरिक्ष्वाकुधर्म्मनंदनः वि
ष्णुरेव न संदेहस्त्वं च लक्ष्मीपतिव्रता १२ सर्वतीर्थमयी देवी नृपतेरतिवल्लभा यया शुश्रूषितो भर्ता भव
त्या एकचित्तया १३ मम माता पिता त्वं च त्वमेव गुरुसत्तमः मां च पापां दुराचारां सम्यक् ज्ञानविवर्जितां १४
यातनाभ्यः सुभीतां मामुद्धरस्व पतिव्रते एकस्य दिवसस्यापि देहि पतिव्रते १५ सुकुलोवाच एवं श्रुत्वा
यदा राज्ञी राजानमवलोकयत राजा प्रोवाच शुभगे उद्धरेनां सुदुःखितां १६ अथ श्रुत्वा वचो राज्ञी तस्यै पु
ण्यं ददौ स्वकं एकवर्षोद्भवं पुण्यं लब्ध्वा सा तत्क्षणादभूत १७ तेजोरूपधरा दिव्यमाल्यवस्त्रविभूषणैः
विभूषिता विमानस्था प्रणता तामुवाच ह १८ स्वस्त्यस्तु ते राज्ञि तव प्रसादात् पापाप्यहं यामि हरेः सलोक
तां धर्म्मप्रवृद्धिः शुभकीर्त्तिलाभो विष्णोः प्रसादात्तव चापि चास्तु नित्यं १९ इति श्रीस्कंदपुराणे मार्ग

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

श्रीपॆमाहात्म्येसुकुलेतिहासेषड्विंशोध्यायः २६ सूतउवाच तस्यांध्यानेप्रभावंचपतिभावंसुरेश्वरः दृष्ट्वासं
स्मारकामंचसरत्वासहप्रागतः १ इंद्रउवाच सुकुलेयंमहाभागपातिव्रत्यपरायणा सखेतांवशमानीयकु
रुकार्य्यंममाऽधुना २ कामउवाच देवानृषीन्समर्थोहंजेतुंसाकिंममागतः नारीममगृहेतात तत्रैवनिव
साम्यहं ३ स्वभावेनाऽवलादेवीसंततंप्राममार्गणैः भ्रातरंपितरंदृष्ट्वास्वन्यंवापिस्वबांधवं ४ सुरूपंसुगुणं
देवममवाराहतासती स्पृहतेनात्रसंदेहःपातकंनेदृचिंतयेत ५ इंद्रउवाच पुरुषोऽहंभविष्यामिरूपवान्ध
नवान्युवा कौतुकार्थमिमांनारींचालयत्वमनोभव ६ सूतउवाच एवंकामंसमादिश्यजगामसुरराट्स्वयं
यत्रसातिष्ठतेदेवीकृकलस्यप्रियासती ७ आत्मलीलांचरूपंचगुणभावंप्रदर्शयन् अथेंद्रप्रेषितादेवी
सुकलांवाक्यमब्रवीत ८ अहोसत्यमहोधैर्यमहोकांतिर्महोक्षमा यस्यास्त्वंसुगुणाभार्यासधन्यःपुण्य ३९
भाग्भुवि ९ कस्मात्त्वंदुःखसंयुक्तावदस्वमममागतः सुकुलोवाच ममभर्तातीर्थयात्रांगतस्तेनास्मिदुः कृ०स०
खिता १० ब्रूहिकासिमहाभागेयत्त्वंमांपरिपृच्छसि दूत्युवाच यस्त्वांत्यक्त्वागतःपापीनिर्घृणःसुगुणां

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

प्रियं ११ किंवा मृतो जीवति वा किं वृथा खिद्यसे शुभे बाल्येनैव जरा प्राप्ता हि सुखतृप्तिश्च विद्यते १२ यावत्ति
ष्ठति तारुण्यं तावद्वै भुज्यते सुखं जले गते यथा बंधस्तथा रतिर्ते हि यौवने १३ किं करिष्यसि देहेन सु
खं भुंक्ष्व वरानने रूपवान्गुणवान्नेषोधनी रति विधानवित् १४ तवार्थे नित्यसंयुक्तः कामवाणेन
दह्यते एतेन सुखमाप्नोति स्नेहेन वरवर्णिनि १५ शुकुलोवाच सत्यमुक्तं त्वया भद्रे शृणुष्व मम भाषि
तं बाल्यं नास्ति हि जीवस्य तारुण्यं न च वार्द्धकं १६ अजरश्चामरो व्यापी सुसिद्धः सर्ववित्तमः आ
कारः कामदेनो केश्चात्मरूपेण वर्त्तते १७ यथा गेहस्य संस्थानं तथा कामस्य दृश्यते अस्माभिः काष्ठ
लोष्टैश्च नानादारुसमुच्चयैः १८ लेपितं मंजुलैस्तत्र चित्रं भवति चित्रकैः तद्गृहं पतमानं हि ज्ञात्वा स्वा
मी परित्यजेत् १९ शरीरमस्थिरुधिरमांसत्वग्लोमभिः कृतं श्लेष्मविण्मूत्रपूर्णं च तृष्णाव्याधि
समाकुलं २० रूपवान्पुरुषः कोसौ का चाहं वद दूतिके किमर्थमिच्छितोसि त्वं धिक् त्वां ज्ञानविवर्जितां २१

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

स्वरूपो रूपवान्देवो त्यात्मा सर्वगतः शुभे तेन त्वं सर्गप्रकाशेन तद्वियोगेन नश्यति २२ एवं वदस्व तेगता
यदर्थमिह मागता सूत उवाच साश्रुत्वा कंपयामास शक्रायसकलं वचः २३ इंद्र उवाच ईदृशीन भवे
त्कापि सत्यमुक्ता पतिव्रता कामदेव महाभाग दर्शयस्वाघ योरुषं २४ तयाद्रूत्याः किंचिदपि वचनं नैव
मेकृतं कामोपि प्रविवेशाथ कायं तस्या महावलः २५ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये सुकुला
ख्याने सप्तविंशोऽध्यायः २७ सूत उवाच वनमध्यं गता सा तु सुकुला वाच तां सखीं सखि कस्य वनं
त्वेतत सर्वतः सुमनोहरं १ क्रीडा मत्युवाच वनमेतद्धि कामस्य वसंतेन प्रसाधितं वायुना वीजितं सर्वं
सुरभीकृतदिङ्मुखं २ सूत उवाच तयोः सुभाषितं श्रुत्वा रतिस्तत्र समागता तां मिलित्वा वनं गत्वा दद
र्शुः परमाद्भुतं ३ तत्र शक्रः समागत्य सुकुलां वाक्यमब्रवीत् इंद्र उवाच मयाद्रूती प्रेषिता ते सकाशं प्रा ८०
प्रियं वदेत ४ नायातां सिकथं ब्रूहि स्वयमागतो भजस्व मां सुकुला उवाच कथं कुतः समायातो निर्भ

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

शोभरणान्विता: ५ भर्त्तुर्म्मेरक्षका:संतियेत्वांमेत्स्यंतिसादरैः इंद्रउवाच त्वामेवाहंप्रपश्यामिवनम
ध्येसमागतां ६ सहायरहितामेकांममकस्माद्भयंभवेत् कुत्रतेरक्षका:संतिदर्शयस्वममागतः ७
सुकलाउ॰ सत्यधर्म्मादयाश्चैवज्ञानाद्याःप्रबलाभया: ममभर्त्तुःसहायास्तेवीर्य्यमारक्षंतिसर्वतः ८
दूरंगच्छपलायस्वमैवंतिष्ठममागतः नोचेत्त्वंदेवराजोपिभस्मीभूतोभविष्यसि ९ सूतउवाच इतिश्रु
त्वासहस्राक्षोम्लानास्यःकाममब्रवीत् पश्यपौरुषमेतस्यास्त्वमागच्छमयासह १० पतिव्रतांतांयोगी
२४ शेपौरुषंतेनिर्थकं इत्युक्त्वाकामसहितोययाविंद्रोमरावतीं ११ सुकलापिस्वभवनंसत्येनैवसमागता
सर्वतीर्थमयीपुण्यापतिध्यानपरायणा १२ कृकलःसर्वतीर्थेषुमज्जयित्वागृहंप्रति समायातःस्वसा
र्थेनहृष्टांतांचपतिव्रतां १३ अपूजयत्पुनर्देवान्पितॄन्वेदोक्तमार्गतः मार्गशीर्षव्रतस्नानंचकारभार्यया
सह १४ तस्यगेहेसमायातादेवाश्चपितरस्तथा तान्पूजयित्वाकृकलःपप्रच्छस्वविपाककं १५ ऊचुस्तेकृ

जं१

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

कलं श्रीत्या पूर्वजन्मविपाककं पूर्वजन्मनि व्याधस्त्वं कृकलप्राणिघातकः १६ मांसाशी दुष्टहृदयो दया
दानविवर्जितः एकदा त्वं धनुर्गृह्य उपस्युत्थाय सत्वरः १७ सरसो तं समासाद्य दृष्टा जलचरी त्वया वाणेनैके
न निहता मया सरसोंऽभसि १८ तामाने तु जले मग्नः प्रातःस्नानं तथाऽभवत् तस्य पुण्यस्य माहात्म्यात्साभा
ग्यात्तव सांप्रतं १९ त्वं चापि पुण्यवानज्ञातो मार्गशीर्षप्रभावतः वरान् दातुं समायाता वरं वरय तां पुरा २०
कृकल उवाच धर्मे सत्ये रतिर्मेऽस्तु देवे भक्तिरनुत्तमा देहि मे वैष्णवं स्थानं व्रजामि सह भार्यया २१ देवा ऊचुः
एवमस्तु महाभाग सर्वमेतद्भविष्यति सूत उवाच इति देवा वरं दत्वा जग्मुः स्वपितरः सह २२ कृकलोऽपि प्रिया
सार्द्धं वैकुंठमगमत्तदा गार्हस्थ्यं स्त्री विना लोके भवत्येव न संशयः २३ यस्य साध्वी भवेद्भार्या गार्हस्थ्यं
तस्य कामधुक् इहाग्र्यां कीर्तिमाप्नोति परत्र गतिमुत्तमां २४ इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये सुक ४१
लोपाख्याने नामाष्टविंशोऽध्यायः २८ सूत उवाच एवं विधां सवर्णां हि स्त्रीं विवाह्य गृहमाविशेत् एवं गृ कृ स०
हाश्रमे स्थित्वा विधिवत्स्नातको द्विजः १ वने वसेद्वा नियतो यथावद्विजितेंद्रियः गृहस्थः सन्

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

पश्येद्वलीपलितमात्मनः २ तदासर्वंसुतेन्यस्यसदारोवनमाश्रयेत् संत्यज्यग्राम्यमाहारं सर्वंचैवपरिच्छ
दं ३ मुन्यन्नैर्विविधैर्मेध्यैः शाकैःकंदैःफलैरपि तानेवचमहायज्ञान्निर्वपेद्विधिपूर्वकं ४ वसीतचर्म
चीरंवात्रिकालंस्नानमाचरेत् जटाश्चबिभृयान्नित्यंश्मश्रुलोमनखानिच ५ नफालकृष्टमश्नीया
दुत्सृष्टमपिकेनचित् दान्तोनित्यमनागृध्नुः सर्वभूतानुकंपकः ६ दर्शेष्टेपौर्णमासञ्चजुहुयाच्चयथाविधिः
ग्रीष्मेपंचतपास्तुस्याद्वर्षास्वभ्रावकाशकः ७ जलवासस्तुहेमंते वानप्रस्थस्यविधिःस्मृतः वनेषुतुविहृत्यै
वंतृतीयंभागमायुषः ८ चतुर्थमायुषोंत्यंचभिक्षुर्भूत्वाव्रजेनयेत् ऋणानित्रीण्यपाकृत्यमनोमोक्षेनि
वेशयेत् ९ अनपाकृत्यमोक्षंचसेवमानःपतत्यधः अधीत्यचतुरोवेदान्पुत्रानुत्पाद्यधर्मतः १०
इष्ट्वानुशक्तितोयज्ञैर्मनोमोक्षेनिवेशयेत् अनधीत्यद्विजोवेदाननुत्पाद्यतथासुतान् ११ अनिष्ट्वाचै
वयज्ञैश्चमोक्षमिच्छन्व्रजत्यधः आगारादभिनिःक्रांतःपवित्रोपचितोमुनिः १२ समुपोढेषुकामे

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

संस्थिताः २

मुनिरपेक्षः परिव्रजेत् भिक्षां च ग्रामादिप्रागारादाहरेत् तप्रयतो द्विजः १३ नैकवासो वसेद्ग्रामे पंचरात्रं गृहे मुनिः
एवमाश्रमधर्मेण योनयेदायुरात्मनः १४ तस्य लोकद्वये भद्रं जन्मप्रोक्तं मनीषिभिः सर्वे धर्माः कृतयु
गे भवंती नितरां द्विजाः १५ वेदानां प्रविभागोन सर्वे स्वाचाररततत्पराः कामादिदोषनिर्मुक्ताः शमादिषु चत
त्पराः १६ आश्रमाचारनिरता गतासूयाः स्वदांभिकाः सत्यवाक्यरताः सर्वे वर्णाधर्मपरायणाः १७ वेदा
ध्ययनसंपन्नाः सर्वशास्त्रविशारदाः नाधर्मनिरताः केचिन्नैवान्नक्रयविक्रयौ १८ चतुःपादैस्त्र धर्म
स्तु शुक्लो नारायणः स्मृतः तथा त्रेतायुगे प्राप्ते धर्मः पादेन तां व्रजेत् १९ हरिस्तु रक्ततां याति किंचित्क्लेशा
न्विताः प्रजाः क्रियायोगरताः सर्वे सत्यज्ञानपरायणाः २० तथैव द्वापरे प्राप्ते द्विपादेनो वृषो मतः पीततां ४२
च हरिर्याति वेदश्चापि विभज्यते २१ ब्राह्मणाद्याश्च वर्णाश्च केचिद्रागसमन्विताः केचित्स्वर्गोपभोगाय कृत्स्नं
विप्रां यज्ञान्प्रकुर्वते २२ केचिद्धनपराः केचित्कामासक्ताः कलौ नराः अधर्मस्य प्रभावेन क्षीयंते च प्रजास्त

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

या २३ केचित्पुराणपठनं दृष्ट्वा ह्यसूयां कुर्वंति सदा २४ एवं हि वर्णाश्रमतत्परा जना युगत्रये सुः सक
ले महीतले प्रजाः कलौ सत्वहरे विमार्गगाः सर्वा भविष्यंति न संशयोऽत्र २५ इति श्रीस्कंदपुराणे मार्गशी
र्षमाहात्म्ये युगत्रयनिरूपणं नामैकोनत्रिंशोऽध्यायः २९ शौनक उवाच सूत नो वद कीदृश्यः प्रजाः
प्राप्ते कलौ युगे भविष्यंति च किंशीला भवित्री कीदृशी गतिः १ सूत उवाच कलेः स्थितिं प्रवक्ष्यामि शृणु
ध्वं मुनिसत्तमाः धर्मः कलियुगे प्राप्ते त्रिपादेनः प्रवर्त्तते २ तामसं युगमासाद्य हरिः कृष्णत्वमागतः
व्रताचाराः प्रणश्यंति ध्यानयज्ञादयस्तथा ३ नरं धर्मरतं दृष्ट्वा सर्वे ह्यसूयां प्रकुर्वते उपद्रवा भविष्यंति
ह्यधर्मस्य प्रवर्त्तनात् ४ असूयानिरताः सर्वे दंभाचारपरायणाः प्रजाश्चाल्पायुषः सर्वास्तथाल्प
सुखभागकाः ५ लोलुपाश्च कृतघ्नाश्च द्विजा वेदपराङ्मुखाः विद्यागतहराः स्तन्यत्वाद्वर्णानां संकरस्त
था ६ कामक्रोधपरा मूर्त्ता वृथाहंकारदूषिताः वद्धवैरा भविष्यंति परस्परवधेप्सवः ७ अल्पायु

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

श्च भविष्यंतितपःसत्यविवर्जिताः सर्वेजन्नादयाहीनादाक्षिण्यपरिवर्जिताः ८ उत्तमानीचतांयांतिनीचाश्चो
त्तमतांगताः राजानश्चार्थनिरताधर्मविध्वंसकारिणः ९ स्त्रीणांभार्यांपरित्यज्यपरदाराभिगामिनः द्विषं
तिपितरंपुत्रागुरुंशिष्यःपतिंस्त्रियः १० मत्स्यामिषेणजीवंतिदुह्यंतश्चाप्यजाविकाः नदीतीरेषुकुद्दालैः
सस्योत्पत्तिर्भविष्यति ११ कृपणानांद्विजानांचसाधूनांबांधवांस्तथा विधवानांतथास्त्रीणांधनान्यप
हरंतिच १२ नव्रतानिचरिष्यंतिब्राह्मणाःवेदनिंदकाः नयक्ष्यंतिनहोष्यंतिहेतुवादैर्विनाशिताः १३
द्विजाःकुर्वंतिदंभार्थंपितृदेवादिकाःक्रियाः नीरोयपात्रविनिमितेनतुगोषुप्रीतिर्भविष्यति १४ अकाल
कर्मनिरताःकूटयुक्तिविशारदाः वेदनिंदापराश्चैववेदविप्लवदूषकाः १५ तीर्थयज्ञजपादीनांवि
क्रेतारःफलस्यच शूद्रस्त्रीसंगनिरताःशूद्रान्नपरिभोगिनः १६ द्विजाःशूद्रसमाचाराःशूद्राःसं ४३
न्यासकारिणः शूद्राधर्मानवदिष्यंतिब्राह्मणाश्चानुजीविनः १७ गीतवाद्यपराविप्राविदवादपराङ्मु कृष्ण०
खाः हरीरोनचदातारःशूद्रमार्गप्रवर्तिनः १८ आत्मस्तुतिपराःसर्वेपरनिंदापरायणाः विस्वासहीनाः

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

ति१

पिशुनाः पितृदेवद्विजादिषु १९ असंस्कृतो क्रियाभ्रष्टो वंधुद्वेषपरास्तथा अत्याल्हादपरास्तत्र भुंजंते पर
वेश्मसु २० स्वकर्मत्यागिनः सर्वे कृतघ्ना भिन्नवृत्तयः धनविद्यावनोन्मत्ताः सर्वे दुःखैः प्रपीडिताः २१
व्याधितस्करदुर्भिक्षैः पीडिता अपिमायिनः धर्ममार्गच्युता नारी तिरस्कुर्वंति मायिनः २२ अत्यंतकामिनः
सर्वे राजानो म्लेछजातयः रसविक्रयिणः सर्वे भविष्यंति द्विजातयः २३ अपत्यविक्रयरता धनाढ्या
अप्रियाचकाः शूद्रवृत्त्याच जीवंति द्विजा नरकगामिनः २४ कामार्त्ताः स्वदेहाश्च वक्तुंनाशनतत्पराः
असद्वृत्ता भविष्यंति पुरुषेषु कुलांगनाः २५ परुषानृतवादिन्यो देहसंस्कारवर्जिताः वाचालाश्च भवि
ष्यंति पतिप्रेमविवर्जिताः २६ पंचमे वाथ षष्ठे वा वर्षे कन्या प्रसूयते दुर्भिक्षकरपीडाभिरतीवोपद्रु
ताजनाः २७ चौरादिभयभीताश्च देशाद्देशांतरं गताः निधाय हृदि कर्माणि कथयिष्यंति शोभ
नं २८ स्वकार्यसिद्धिपर्यंतं बंधुत्वं च जनेष्वपि विशीलिनोऽनृतपरा नरा मद्यामिषप्रियाः २९

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

श्रीभविष्यं

८४

भार्य्याप्रियाश्च भविष्यंति श्यालश्वशुरबांधवाः वैरिणो भागिनेयाश्च भगिन्यो भ्रातरस्तथा ३० तरुणा वृद्ध
शीलाश्च वृद्धास्तरुणशीलिनः उग्रमात्सुखिनो लोका राजानः क्रूरविक्रमाः ३१ वर्षासु वाताः परुषाः
शर्कराश्मप्रवर्षिणः संदिग्धश्च परे लोका धर्म्मश्रद्धाविवर्ज्जिताः ३२ सर्वे ब्रह्म वदिष्यंति वृद्धाननुपसेव्य
ति नकश्चिदकविर्नामा सुरापाश्च द्विजातयः ३३ नक्ष[illegible]वसूचका विप्रा वेषाः शास्त्रविवर्ज्जिताः शास्त्रा
र्थस्य प्रवक्तारो न तु शास्त्रोक्तकारिणः ३४ एकशंखास्तथा नार्य्यो गवेधुकपिनद्धकाः संध्यारागोपदि
ग्धदेहा नान्येन्यान्तस्तथा भुवि ३५ पितृनपुत्रा निंदिष्यंति स्नुषाः श्वश्रूश्च कर्म्मणि दिवोगिन्याश्च
यष्यंति पुत्रदारांनरास्तथा ३६ पत्नीन्नसुप्तानवंचयित्वा गमिष्यंति स्त्रियोन्यतः पुरुषाश्च प्रसुप्तास्तु
भार्य्यास्तु च परस्त्रियं ३७ नकृते प्रतिकर्त्तारो भविष्यंति कलौ युगे उद्भ्रांतो धर्म्मशीलाः केचिन्म
ध्यस्थतां गताः ३८ अप्रमाणां करिष्यंति वेदोक्तं अपरे जनाः भविष्यंति नरामूढा गर्विताः पंडितमानिनः ३९
निःस्वाध्यायवषट्काराः ब्राह्मणा कृषिमानिनः तदाससा ब्रह्मरूपेता सर्वे भक्ष्या वृषा वृताः ४०

८४

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

धान्यानि ग्स्या द्वनीनानि सत्तं वृत्तं च पूजितं भृत्याश्चानिद्दृषिभुजो भविष्यंति कलौ युगे ४१ ग्रासपचौरा
भविष्यंति तथा चैला पहारिणः निःसारे क्षुभिते लोके निःक्रियेसत्ववर्जिताः ४२ नराः ग्राश्रयिष्यंति
वने करभार प्रपीडिताः कीटमूषकसर्पाश्च धर्षयिष्यंति मानवान् ४३ दुर्भिक्षव्याधि बहुले चौ
र्य्ये चापि स्व बंधुभिः स्वपं पालाः स्वपं चोरा राजानो दुष्टमानसाः ४४ अंगवंगकलिंगादीनाश्रयि
ष्यंति मानवाः मृगैश्चैव विहंगैश्च श्वापदैरुग्रजंतुभिः ४५ मधुशाकफलैर्मूलैर्वर्त्तयिष्यंति वै कलौ
परीधानं चवल्कलं वल्कलान्यजिनानि च ४६ स्वयं कृतानि स्थित्यर्थं यथा मुनिजनास्तथा ग्रजेड
कास्वरोषु चपालयिष्यंति यत्नतः ४७ नदीस्रोतां सिरोत्स्यंति तोयार्थं कूपमाश्रिताः दरिद्रिणो वक्
यत्याः प्रजाहीना धनान्विताः ४८ तस्माद् द्विजाद्धोरतरे कलौ युगे तीर्थानि सेव्यानि हरिर्हि सेव्यः
नास्त्यत्र लोके हरि भक्तितो न्यत संसार निस्तारक लावुपायः ४९ इति श्रीस्कंदपुराणे मार्गशीर्ष

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

मार्ग० मा०

माहात्म्ये कलियुगनिरूपणं नाम त्रिंशोऽध्यायः ३० ऋषय ऊचुः कस्मिन् तीर्थे महाभाग मार्गशीर्षोऽधिकः
स्मृतः किं फलं च भवेत्तत्र सर्वमेतद्वदस्व नः १ सूत उवाच मार्गशीर्षे महापुण्या मथुरा काशिका तथा प्र
८५ प्रयागं वा हरिद्वारं द्वारिकां कोशलामपि २ मार्गे च शुक्लद्वादश्यां स्नात्वा वै यामुने जले मथुरायां हरिं दृष्ट्वा
प्राप्नोति परमां गतिं ३ दृष्ट्वा भूतपतिं देवं वरदं पापनाशनं तेन दृष्टेन मनुजो माथुरं फलमाप्नुयात् ४ तत्र
तीर्थोत्तमं चास्ति विश्रान्तिरिति कथ्यते स्नात्वा सर्वतीर्थानि तत्र विश्रान्तिमाप्नुयुः ५ अस्ति तत्र परं तीर्थं
तिंदुकं च सुपुण्यदं ततः परं सूर्यतीर्थं सर्वपापप्रमोचनं ६ आदित्ये रविवारे च संक्रान्तौ ग्रहणे च यः सूर्य
यो: तस्मिन् स्नातो नरो नित्यं राजसूयफलं लभेत् ७ ततो ध्रुवस्य तीर्थं स्यात् ऋषितीर्थं ततः परं
तपोऽस्तु स्नानमात्रेण हरेर्भक्तिर्दृढा भवेत् ८ ततः संयमनं नाम बुद्धतीर्थं ततः परं वैकुण्ठलोकं ८५
नाम तीर्थं पापप्रमोचनं ९ सोमतीर्थं सरस्वत्याः तीर्थं चक्राङ्कमेव च दशाश्वमेधकं नाम विघ्नराज

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

जस्यतीर्थकं १० गोकर्णाख्यं कोटितीर्थं वैकुंठाख्यं ततः परं चतुःसमुद्रकं नाम कूपं लोकेषु विश्रुतं ११ तत्र
स्नातो नरो भक्त्या देवैः सार्द्धं तु मोदते सा गंगा तः प्रातगुरणा माथुरे यमुना स्मृता १२ पूर्णिमायां तु मागीस्य स
मभ्यर्च्य जनार्दनं धन्योऽसौ पिंडनिर्वापं यमुनायां करिष्यति १३ यस्तत्र निवसेद्धीमान संयतात्मा जि
तेंद्रियः त्रिकालमपि भुंजानो वायुभक्षसमो भवेत् १४ तिष्ठेद्युगसहस्रं वै पादेनैकेन यः पुमान्
तस्माद्धिकं भवेत् पुण्यं मथुरायां तु यो वसेत् १५ रम्यं मधुवनं नाम विष्णोः स्थानमनुत्तमं यं दृष्ट्वा मनु
जो देवः सर्वान् कामानवाप्नुयात् १६ यत्रानेकान्यरण्यानि यानि गत्वा दिवं व्रजेत् आद्यं तालवनं रम्यं
चान्यद्बिल्ववनं परं १७ भांडीरं च वनं श्रेष्ठं महद्वृंदावनं वनं गोविंदातिप्रियं पुण्यं यत्र गोवर्द्धनो हरिः १८
तत्र कुंडं महच्चास्ति बहुगुल्मलतावृतं कालीयस्य ह्रदं गत्वा एकरात्रोषितो नरः १९ गंधर्वैरप्सरोभिश्च
गीतैर्मानो व्रजेद्दिवं तत्र गोवर्द्धनं प्राप्य कृत्वा तस्य प्रदक्षिणं २० न तस्य पुनरावृत्तिः सत्यं सत्यं न संशयः
तत्र गोवर्द्धने रम्ये राधाकुंडं हरिप्रियं २१ तत्र स्नात्वा नरो गच्छेद्वैकुंठभवनं हरेः अक्रूरतीर्थमन्यत्र

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

स्व

गं०श्रीपं० चास्तितत्रमहाद्भुतं २२ कुरुक्षेत्राच्छतगुणंमथुरानाथसंश्रयः सहोमासे पूर्णिमायांयत्किंचित्क्रियतेन
रैः २३ मथुरायांतथान्यत्रततपुरायं चाक्षयंभवेत् क्षेत्रभूः श्रायसंपन्नाप्येनदत्ताविधानतः २४ सहोमासे
१६ पूर्णिमायांसगच्छेद्वैष्णवंपदं येरत्नगृहदानंचविप्रेभ्योभोजनंतथा २५ गोदानंस्वर्णदानंचवस्त्रान्नादि
चयद्भवेत् पौर्णमास्यांसहोमासेदानेस्यादक्षयंफलं २६ सापौर्णमासीलभेतेगंगायांयदिभाग्यतः
स्नानादेवफलंतत्रयज्ञकोटिसमंभवेत् २७ त्रैलोक्यनाथोभगवान्विष्णुःपरमपावनः द्रवरूपंचतस्मै
व गंगावारिनसंश्रयः २८ क्षेत्राणिमुक्तिदानीह पुरयोंग्रामकानोचराः तपांसिश्रुतयोवेदधर्मा
ज्ञाः सदक्षिणाः २९ गंगायांसर्वएवैतेसूक्ष्मरूपेणसंस्थिताः सःस्नातःसर्वतीर्थेषुसर्वक्रतुषुदीक्षितः
३० चीर्णसर्वव्रतःसोपियस्तुगंगांनिषेवते सर्ववर्णाश्रमेभ्यश्चवेदविप्रेभ्यश्चवेतथा ३१ शास्त्रार्थपारगेभ्य हुम
श्चगंगास्नायीविशिष्यते मनोवाककायजैर्दोषैर्दुष्टोबहुविधैरपि ३२ वीक्ष्यगंगांभवेत्पूतःपुरुषोना
त्रसंशयः योदेहपातपर्यंतंगंगातीरंनमुंचति ३३ सहिवसंतविघ्नोगीव्रह्मचर्यव्रतीसदा कालोक

४६

रापा ४

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri MoE

५०

५० लुब्धचित्तानां पापद्रव्यरतात्मनां ३४ विधिहीनक्रियाणां च गतिर्गंगां विना न हि किमष्टांगेन योगेन किं
तपोभिः किमध्वरैः ३५ वासएव हि गंगायां कुलज्ञानस्य कारणं पूर्णायामेव कर्तव्यो व्रतपूर्तिकरोत्सवः ३६
४८ स्नानं दानं च कर्तव्यं तथैव हरिपूजनं रात्रौ जागरणं कुर्याद्गीतनर्त्तनवाद्यकैः ३७ एतद्व्रतं कथितं विप्रा
मार्गशीर्षे हरिप्रिये यः करोति नरो भक्त्या चतुर्वर्गैः स युज्यते ३८ मार्गशीर्षस्य माहात्म्यं यस्तु श्राव
येत शुचिः तस्य तुष्ट्या हरेस्तुष्टिस्तस्मै देयं सुवर्णकं ३९ दंपत्यो विविधं वस्त्रं पात्रं भोज्यं च गां तथा
विप्रेभ्यो भोजनं देयं मधुरान्नैः सुसंस्कृतैः ४० स्वयं स्वबंधुभिः पश्चाद्भोजनं तु समाचरेत् अन्ये
भ्यो दापयेद्भक्त्या विंशद्ग्रांडानि शक्तितः ४१ सद्व्यं [redacted] वस्त्रमध्वान्नैः पूर्ण्यं सद्वत्नैकेराय ८२ ४८
इति श्रीस्कंदपुराणे मार्गशीर्षमाहात्म्ये क्षेत्रादिनिरूपणं नामैकत्रिंशोऽध्यायः ३१ क्रम

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri. Funding:IKS-MoE

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow